SĀHITYASĀRA

OF

SARVEŚVARĀCARYA

THE KUPPUSWAMY SASTRI
RESEARCH INSTITUTE
64, B. H ROAD, MADRAS-4



PUBLISHED BY

THE UNIVERSITY MANUSCRIPTS LIBRARY,

TRIVANDRUM.

TRIVANDRUM :

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1947.

INTRODUCTION.

Sarveśvarācārya, the author of *Sāhityasāra*, is known from his own statements in the beginning of the work to be the son of Trivikrama and a disciple of Vāmarāśimuni of Agastyeśvara, which may perhaps be the modern Agastyesvaram taluk in South Travancere. The author is known from the colophon in the work as: "मलयजमहापण्डितसर्वेश्वराचार्यः" and the term 'मलयज' suggests that he may be a south Indian, 'probably a Keralīya. Two works 'षट्सहस्री' (I. 24) and 'काव्यसार' (II. 36,37) are referred to by the author; the former may be an old work on the subject which is found referred to by the author of *Daśarūpakāvaloka* (IV. 2) also, while the latter may be a different work which deals with the *Citrakāvya* in detail. Nothing more is known about the author of *Sāhityasāra*[1].

The work *Sāhityasāra* is a metrical composition in six prakāśas, the first prakāśa containing 109 verses, the second 162 verses, the third 79 verses, the fourth 86 verses, the fifth 121 verses and the sixth 65 verses, thus making a total of 622 verses (with two additional verses at the end giving the total number of the verses in the text and eulogising the author for the very composition of the work). But the verse at the end says:

"अस्य साहित्यसारस्य सङ्ख्या सर्वेशकल्पिता ।
भवेदष्टाधिकैवात्र षट्च्छती सुमनोहरा ॥"

that the whole text contains 608 verses only. So about 14 verses more are found in this printed text.

1. A Sarveśvara is known to be the author of *Mahābhāṣyapradīpasphūrtiḥ*, but he is different from the author of *Sāhityasāra*, as he was the son of Vaikaṭa of Saddarśana family (vide Madras MS. D. Nos. 1305—1308). Īśānadeva of Benares, who belonged to the 14th century A. D., refers in his commentary on *Naiṣadhīyacarita* (B. O. R. I, Ms. No. 188 | 1879—80) to a Vāmarāśi a his guru. It is not possible to say whether this Vāmarāśi is identical with the guru of Sarveśvara.

The peculiarity of this work is that it gives only the *lakṣaṇas*, and not the *udāharaṇas* (illustrations). The *Nāṭyaśāstra*, the *Daśarūpaka* and the *Bhāvaprakāśana* are the works which the author has made use of with great advantage.

The first prakāśa begins with a prayer and introduction which mentions the names of the teacher and father of the author. The author cites the names of a few pūrvācāryas in the field—Bharata, Uttara, Kohala and the work *Bharata-vistara*. He defines both the *prayoktā* (actor) and the *prekṣaka* (the spectator) in a drama. He then enumerates the ten main varieties of dramas—*nāṭaka*, *prakaraṇa*, *bhāṇa*, *īhāmṛga*, *vīthī*, *vyāyoga*, *samavakāra*, *aṅka*, *prahasana* and *ḍima*. Of these ten, *nāṭaka* is the model (*prakṛti*) to all others and is the most important and popular among them. Hence the *nāṭaka* is defined first. It is a play containing *nāndī*, *prastāvanā*, *vastu*, *bīja*, *bindu*, *sandhis*, *vṛttis*, absence of poetic defects, presence of poetic embellishments, *lakṣaṇas*, technical terms to address various dramatic characters, *aṅkāvatāra*, *viṣkambha*, *cūlikā*, *aṅkāsya* and *praveśaka* to indicate certain parts of stories to the audience, a *nāyaka* and *nāyikā* with their attendants, speeches with *kāku*, and, above all, delineation of an *aṅgi-rasa*—a chief sentiment—along with *aṅgarasas*. All these would result in the attainment of *caturvarga*, *viz.* *dharma*, *artha*, *kāma* and *mokṣa*, as well as the disinterested, impersonal pleasure known as 'aesthetic pleasure', by a cultured spectator (*sahṛdaya*). The whole work is an elaboration of all the topics mentioned above, and after giving the full description of the *nāṭaka*, the special features of the nine other *rūpakas*—the *vikṛtis*—and the two *uparūpakas*—*saṭṭaka* and *nāṭikā* are given towards the end.

The word नान्दी is explained as the worship of God Śiva on the theatre (*raṅga*), which is believed to be the transformation of the Divine Bull at Lord Śiva's will when He

Professor of Sanskrit (Retd.)
7, Srikrishnapuram Street.
Royapettah, Madras-600014

danced at the beginning of the creation of the world. Another explanation is that it pleases all those assembled when it is performed with its twenty-two accessories in the *pūrvaraṅga*. The second is what is popularly understood by a *nāndī*. Both these definitions of *nāndī* are found in *Bhāvaprakāśana* (pp. 196, 197).

Prastāvanā or Prologue is conducted chiefly by the stage-manager (*sūtradhāra*) to introduce the main story to an audience. It is of two kinds—आमुख and स्थापना. *Āmukha* is defined as that which has a *sūtradhāra* conversing with his wife *naṭī* to introduce the main story to the audience in a decent manner. *Sthāpanā* is that where the *sūtradhāra* has a male companion—a *pāripārśvaka* or a *vidūṣaka*. This distinction is not, however, generally followed either in dramatic works or in works on dramaturgy. The *āmukha* is one of the four accessories of the *bhāratīvṛtti*, which is to be adopted in a *nāṭaka* type of drama (I. 42, and II. 2, 3). It is also known as *prastāvanā* in *Daśarūpaka*, *Bhāvaprakāśana* and other works. The *Bhāvaprakāśana* gives three kinds of *āmukha* :—

सूत्रधारो नटीयुक्तो वस्तु प्रस्तावनावधि ।
कुरुते यत्र सद्वृत्तैस्तदामुखमुदाहृतम् ॥
सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ।
स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥
नटो विदूषको वापि पारिपार्श्वक एव वा ।
सूत्रधारेण सहिताः सल्लापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्यार्थैर्वीथ्यङ्गैरन्यथापि वा ।
आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि वा ॥

(Bh. Pr. p. 229).

Of these three the first is adopted by our author as the *āmukha*. The second is adopted by the author of *Daśarūpaka* and it has also been identified with *prastāvanā* :—

सूत्रधारो नटीं ब्रूते मार्षं वाथ विदूषकम् ।
स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥
प्रस्तावना वा (D. R. III. 7).

All the dramas attributed to Bhāsa have a *sthāpanā* which is simpler than *āmukha* or *prastāvanā* found in the dramas of Kālidāsa and other later writers.

Our author divides *Vastu* or the plot of a drama into *mukhya* and *amukhya*, which are the same as आधिकारिक and प्रासङ्गिक in other treatises. The *amukhya* or *prāsaṅgika* is again divided into three – *patākā*, *prakarī* and *patākāsthānaka*. The whole is again divided into *sat*, *asat* and *miśra*, which correspond to *prakhyāta*, *utpādya* and *miśra* in other treatises. Again the story of the drama is divided into *dṛśyaśravya* and *sūcanīya*; the former is to be represented on the stage and the latter, which cannot be staged, is to be indicated to the audience by interludes like *Viṣkambha*.

The development of the plot depends upon the construction of the five sandhis or junctures—मुखसन्धि, प्रतिमुखसन्धि, गर्भसन्धि, विमर्शसन्धि and निर्वहणसन्धि with their accessories. The *mukhasandhi* is the combination of *bīja* and *ārambha* and it has twelve accessories. The *pratimukhasandhi*, a combination of *bindu* and *yatna*, has thirteen accessories. The *garbhasandhi*, the combination of *patākā* and *prāptyāśā*, possesses twelve accessories. The *avamarśasandhi*, the combination of *prakarī* and *niyatāpti* has thirteen accessories. The *nirvahaṇasandhi*, a combination of *kārya* and *phalāgama* has fourteen accessories. All these are detailed in *Nāṭyaśāstra* and other works on dramaturgy which our author has closely followed.

The next topic is the *arthavṛttis* which are four — *bhāratī*, *sāttvatī*, *kāiśikī* and *ārabhaṭī*. The *bhāratīvṛtti* is to be adopted in a *nāṭaka*. The accessories of each *vṛtti* are given in this work as found in *Nāṭyaśāstra* and other works. The *kaiśikīvṛtti* is described as possessing eighteen

angas besides the well-known four beginning with *narmas-phañja*. The eighteen *angas* ars given as follows :—

वचश्शुद्धं रूपशुद्धं क्रियाशुद्धं तथैव च ।
वाचानुरागकथनं वेषव्यक्तिकरं तथा ॥

चेष्टाव्यक्तिकरं चैव वागिच्छाप्रतिपादनम् ।
रूपेच्छाकथनं चेष्टास्पष्टीकरणमेव च ॥

वाग्भेदनं भेदरूपं क्रियाभेदनमेव च ।
वाग्भयं भयरूपं च चेष्टा भयकरं तथा ॥

वाग्भीत्यपरसंयोगि वेषभीत्यपराश्रयि ।
चेष्टाभयान्यसंयोगीत्येवमष्टादशात्मकम् ॥

(II. 16-19)

All these are also defined by our author in verses II. 20-34.

The *Kāvyadoṣas* — the poetic demerits — form the subject of the next topic. They belong to *pada*, *vākya* and *vākyārtha*. 25 *padadoṣas*, 16 *vākyadoṣas* and 7 *vākyārtha-doṣas* are enumerated and defined. They are as follows :—

Padadoṣas :—

1. सम्बन्धहीनं,
2. दुर्बोधं,
3. अप्रसिद्धं,
4. अनर्थकं,
5. गूढार्थं,
6. रूढिरहितं,
7. अप्रतीतं,
8. अवाचकं,
9. क्लिष्टं,
10. म्लानं,
11. अपुष्टार्थं,
12. असाधु,
13. समयच्युतं,
14. अक्षमार्थान्तरं,
15. कष्टं,
16. अप्रयुक्तं,
17. ससंशयं,
18. विरुद्धार्थान्तरं,
19. भ्रष्टं,
20. अपार्थं,
21. ग्राम्यं,
22. अस्तुतं,
23. पर्यायज्ञापकं,
24. देश्यं,
25. असम्भाव्यार्थसाधकम् ।

Vākyadoṣas :—

1. शब्दच्युतं,
2. क्रमापेतं,
3. अश्राव्यं,
4. पुनरुक्तिमत् ,
5. छन्दोभङ्गाकुल,
6. ग्राम्यं,
7. व्याकीर्णं,
8. भग्नरीतिकं,
9. यतिभङ्गाश्रयं,
10. न्यूनं,
11. अधिकं,
12. वाक्यगर्भितं,
13. विरुद्धसन्धि,
14. निस्सन्धि,
15. तुच्छार्थकं,
16. अवाचकम ।

Vākyārthadoṣas :—

1. औचित्यभङ्गः,
2. सन्देहः,
3. रीतिभङ्गः,
4. क्रमच्युतिः,
5. उपक्रमोपसंहारविषमं,
6. दुष्टभूषणं,
7. दुष्प्रतीतिकरम् ।

The ten well-known *kāvyaguṇas* are then described :—

श्लेषः, प्रसादः, समता, माधुर्यं, सुकुमारता,
अर्थव्यक्तिः, उदारत्वं, ओजः, कान्तिः, समाधिः ।

Thirty *alaṁkāras* with their definitions are then given :—

1. अपह्नुतिः,
2. समासोक्तिः,
3. उपमा (and its varieties),
4. दीपकं (and its varieties),
5. क्रमः (यथासङ्ख्यं),
6. विशेषः,
7. रूपकं,
8. जातिः (स्वभावोक्तिः),
9. उत्प्रेक्षा,
10. व्याजवर्णनं,
11. अप्रस्तुतस्तुतिः,
12. साम्यं (तुल्ययोगिता)
13. एकावलिः,
14. विभावना,
15. आक्षेपः,
16. व्यतिरेकः,
17. श्लेषः,
18. अर्थान्तरं,

19. पर्यायोक्तं,
20. विरोधः,
21. सङ्कीर्णं,
22. रसवत्,
23. अतिशयोक्तिः,
24. अत्युक्तिः,
25. वक्रोक्तिः,
26. ध्वनिः,
27. अन्योन्यं,
28. अनुमानं,
29. चित्रं,
30. यमकम् ।

The *citrālṅkāra*, the author says, has been elaborately explained in the work *Kāvyasāra*. He, however, gives a few varieties :

1. *Praśnottara* (with three sub-varieties अन्तर्लापिकम, बहिर्लापिकम and त्रिभङ्गी ।)
2. *Cakrabandha* (with two important varieties : अङ्गार and चक्र ।) and
3. *Padmabandha*.

The third prakāśa begins with *lakṣaṇas* which are 36 in number. Bharata gives two sets of lakṣaṇas — *Upajāti* set and *Anuṣṭup* set. The Gaekwad edition of *Nāṭyaśāstra* gives the *anuṣṭup* set as a supplement to the 16th chapter— षोडशाध्यायानुबन्ध — with Abhinavagupta's commentary, while the Nirnayasagara edition of the *Nāṭyaśāstra* gives only the *Upajāti* set. The Benares edition of *Nāṭyaśāstra* and Sāgaranandin's *Nāṭakalakṣaṇaratnakośa* and the manuscripts of *Nāṭyaśāstra* in this Library contain only the Anuṣṭup set. Both these sets are, however, commented on by Abhinavagupta, and writers like Bhoja have made use of them and added a few more, thus making a total of 64 lakṣaṇas (Vide Dr. V. Raghavan's essay on 'The History of Lakṣaṇa' in his work *Some Concepts of Alaṅkāraśāstra*.)

Sarveśvara gives the following 36 lakṣaṇas and from the following table it is clear that he has adopted the *upajāti* recension of Bharata, since all the 36 lakṣaṇas as found in the upajāti set are fonnd in his list in a slightly modified order.

	Sarveśvara's list.	*Bharata's upajāti Set.*	*Bharata's Anuṣṭup Set.*
1	भूषणम्	विभूषणम्	भूषणम्
2	अक्षरसङ्घः	अक्षरसङ्गतिः	अक्षरसङ्घातः
3	शोभा	शोभा	शोभा
4	गुणकीर्तनम्	अभिमानः	उदाहरणम्
5	निरुक्तम्	गुणकीर्तनम्	हेतुः
6	अभिमानः	प्रोत्साहनम्	संशयः
7	उदाहरणम्	उदाहरणम्	दृष्टान्तः
8	गुणानुवादः	निरुक्तम्	प्राप्तिः
9	प्रियम्	गुणानुवादः	अभिप्रायः
10	हेतुः	अतिशयः	निदर्शनम्
11	प्रोत्साहनम्	हेतुः	निरुक्तम्
12	सारूप्यम्	सारूप्यम्	सिद्धिः
13	मिथ्याव्यवसायः	मिथ्याध्यवसायः	विशेषणम्
14	सिद्धिः	सिद्धिः	गुणातिपातः
15	दृष्टान्तः	पदोच्चयः	अतिशयः
16	आशीः	आक्रन्दः	तुल्यतर्कः
17	संशयः	मनोरथः	पदोच्चयः
18	कपटम्	आख्यानम्	सिद्धम्
19	क्षमा	याच्ञा	उपादिष्टम्
20	अनुवृत्तिः	प्रतिषेधः	विचारः
21	पदोच्चयः	पृच्छा	विपर्ययः
22	आक्रन्दः	दृष्टान्तः	भ्रंशः
23	परिदेवनम्	निर्भासनम्	अनुनयः
24	उपपत्तिः	संशयः	माला
25	याच्ञा	आशीः	दाक्षिण्यम्
26	प्राप्तिः	प्रियोक्तिः	ग्रहणम्
27	मनोरथः	कपटः	अर्थापत्तिः
28	युक्तिः	क्षमा	प्रसिद्धिः
29	अतिशयः	प्राप्तिः	पृच्छा
30	पृच्छा	पश्चात्तपनम्	सारूप्यम्
31	आख्यानम्	अर्थानुवृत्तिः	मनोरथः
32	प्रतिषेधः	उपपत्तिः	लेशः
33	अनुनीतिः	युक्तिः	संक्षोभः
34	निर्भासः	कार्यः	गुणकीर्तनम्
35	कार्यम्	अनुनीतिः	ज्ञेयाभ्यनुज्ञतासिद्धिः
36	पश्चात्तापः	परिदेवनम्	विषवचनम्

After the lakṣaṇas a few technical terms like *aṅkaṇa* etc. to be used in a drama and the words of address of various characters like *hañje* according to their status and position are explained on the basis of *Nāṭyasāstra* and other works on dramaturgy.

The four h prakāśa begins with the different kinds of dramatic devices to indicate certain parts of stories—अङ्कावतार, विष्कम्भ and चूलिका. Then the three kinds of *nāyikās*—स्वकीया, अन्या, and समाना with their sub-varieties and the eight famous *avasthās* of *nāyikā*—उत्कण्ठिता, विप्रलब्धा etc., together with their attendants are detailed. The twenty *sāttvikāvasthās* of the nāyikās beginning with *bhāva* are then defined. The four main kinds of nāyaka—धीरललित, धीरशान्त, धीरोदात्त and धीरोद्धत, the four *śṛṅgāranāyakas*—दक्षिण, अनुकूल, शठ and धृष्ट, the eight *sāttvikabhāvas* of the Nāyaka ; the attendants of the Nayaka like पीठमर्द, and the different languages to be used by different characters are given. This prakāśa ends with the definition of *aṅkāsya* and *praveśaka*.

The fifth prakāśa begins with the two kinds of *Kākus* —साकाङ्क्षा and निराकाङ्क्षा. It then deals with Rasas, the realisation of which is described as based on the happy combination of suitable *vibhāvas*, *anubhāvas*, *sāttvikabhāvas* and *vyabhicāribhāvas*. This is followed by the description of different *sthāyibhāvas* like *rati* of the eight Rasas beginning with *śṛṅgāra*. The varieties of *Śṛṅgāra—asambhava*, *viyoga* and *sambhoga*; the ten *avasthās*—stages of development like संस्मृति in *asambhava*; the two kinds of *viyoga*—मान and प्रवास, the मान having six *upāyas*—*sāma*, *bheda*, *dāna*, *nati*, *upekṣā* and *rasāntara*; the *sambhogaśṛṅgāra* possessing ten kinds of activities of women like लीला—all these are detailed. The prakāśa closes with the description of each Rasa with its colour, deity and vṛtti, and the main aim of the dramatic art and composition *viz.*, the attainment of the human values and the realisation of the disinterested, impersonal pleasure — *Rasānubhava* by a cultured *sahṛdaya*.

The sixth prakāśa gives the main characteristics of the ten varieties of dramas and two minor kinds *nāṭikā* and *saṭṭaka*, on the basis of *Nāṭyaśāstra* and *Daśarūpaka*. The *nāṭaka* is considered to be the model and the details of it are given first and the special deviations from it are mentioned in the other nine varieties. *Nāṭikā* is based on both *Nāṭaka* and *Prakaraṇa* while *saṭṭaka* is based on *Nāṭikā*.

The present edition of the work is based on the following manuscripts :—

T_1. T_s. No. 475 of the Curator's collection, copied from a manuscript belonging to Viṣṇu Nampūtiri, Ettikkada Illam, Kaduthuruthi, N. Travancore.

T_2. A set of variant readings noted in T_1.

T_3. T_s. 103 Malayalam, of the Curator's collection.

P. MS. No. 1402 of the Palace Library, Trivandrum.

M. MS. No. 12817, presented to the Library by Pandit K. S. Mahadeva Sastri of this Library. The Manuscript is dated 24th Kanni 928 M. E.

THE KUPPUSWAMY SASTRI
RESEARCH INSTITUTE,
64, R.H ROAD, MADRAS-4

विषयानुक्रमणिका।

प्रथमः प्रकाशः।

विषयः	पृष्ठम्	श्लोकः
मङ्गलाचरणम्	१	१
उपोद्घातः	१-२,	१-११
आदिकविप्रशंसा	१	२
सज्जनप्रशंसा	,,	३
दुर्जननिन्दा	,,	४
ग्रन्थकर्तुः नामकथनम्	,,	५
,, ज्ञानप्राप्तिप्रकार-कथनम्	,,	६
,, स्वभारतीप्रशंसा	२	७
,, गुरुनामकथनम्	,,	८
,, पितृनामकथनम्	,,	९
,, इष्टदेवतासङ्कीर्तनम्	,,	१०
,, प्रतिज्ञा	,,	११
काव्यप्रशंसा	,,	१२
साहित्यपण्डितलक्षणम्	,,	१४
अशास्त्रज्ञप्रेक्षकप्रयोक्तृनिन्दा	,,	१५
प्रयोक्तृलक्षणम्	३	१६
प्रेक्षक ,,	,,	१७
नाट्यविभागः	,,	१९
नाटकपदनिर्वचनम्	,,	२१
नटविभागः	,,	,,
भरतादिनटनामभिः वृत्ति विभागः	,,	२३
नाट्यनाटकप्रशंसा	४	,,
नाटकलक्षणम्	४	२५
नान्दीनिर्वचनम्	,,	३०

प्रस्तावना	५-६	३४-४४
प्रस्तावनालक्षणम्	५	३४
प्रस्तावनाविभागः	,,	३५
आमुखलक्षणम्	,,	,,
स्थापनालक्षणम्	,,	३६
प्रस्तावनायां अनुष्टेयनिर्देशः	,,	३७
वस्तु	६-७,	४५-५८
वस्तुनिर्वचनम्	६	४५
वस्तुविभागः	,,	,,
मुख्यामुख्यवस्तुलक्षणे	,,	४६
अमुख्यवस्तुविभागः	,,	,,
पताकालक्षणम्	,,	४७
प्रकरी ,,	,,	४८
पताकास्थानक ,,	,,	४९
पुनर्वस्तुविभागः	,,	५०
सद्वस्तुलक्षणम्	,,	५१
असद्वस्तु ,,	,,	,,
मिश्रवस्तु ,,	,,	५२
पुनरपि वस्तुविभागः	,,	,,
दृश्यश्रव्यलक्षणम्	,,	५३
सूचनीय ,,	,,	५४
चतुःषष्ट्यङ्गकार्यनिवेशनप्रकार-कथनम्	७	५५
,, निर्देशः	,,	५६
बीजलक्षणम्	,,	५८

विषयः	पृष्ठम्	श्लोकः
वि न्दुलक्षणम्	७	५९
सन्धयः	७-१३,	६०-१०९
सन्धिलक्षणविभागौ	७	१०
अवस्थाविभागः	,,	६१
आरम्भलक्षणम्	,,	६२
प्रयत्न ,,	,,	६३
प्राप्त्याशा ,,	,,	,,
नियताप्ति ,,	८	६४
फलोदय ,,	,,	,,
अवान्तरसन्धिनिर्देशः	,,	६५
मुखसन्धिलक्षणम्	,,	६६
प्रतिमुख ,,	,,	,,
गर्भ ,,	,,	६७
निर्वहण ,,	,,	,,
मुखसन्धिः	८-९,	६९-७५
मुखसन्ध्यङ्गानि	८	६९
उपक्षेपलक्षणम्	,,	७१
उपक्षेपविभागः	,,	,,
परिकरलक्षणम्	,,	७२
परिन्यास ,,	९	७३
विलोभन ,,	,,	,,
युक्ति ,,	,,	,,
प्राप्ति ,,	,,	७४
समाधान ,,	,,	,,
विधान ,,	,,	,,
परिभावना ,,	,,	,,
उद्भेद ,,	,,	७५
भेद ,,	,,	,,
करण ,,	,,	

विषयः	पृष्ठम्
प्रतिमुखसन्धिः	९-१०, ७६
प्रतिमुखसन्ध्यङ्गानि	९
उपासनलक्षणम्	,,
उपन्यास ,,	,,
विलास ,,	,,
शम	,,
नर्म ,,	,,
निरोध ,,	,,
वर्णसंहार ,,	,,
वज्र ,,	,,
परिसर्प ,,	१०
नर्मद्युति ,,	,,
प्रणयन	,,
विधूत	,,
गर्भसन्धिः	१०-११, ८४-९
गर्भसन्ध्यङ्गानि	१०
अभूताहरणलक्षणम्	,,
मार्ग ,,	,,
रूप ,,	,,
उदाहरण ,,	,,
[illegible] ,,	,,
सङ्ग ,,	,,
सङ्ग्रह ,,	,,
आक्षेप ,,	,,
सम्भ्रम ,,	,,
अनुमान ,,	,,
तोटक ,,	११
अतिबल ,,	,,

विषयः	पृष्ठम्	श्लोकः
बिन्दुलक्षणम्	७	५९
सन्धयः	७-१३,	६०-१०९
सन्धिलक्षणविभागौ	७	१०
अवस्थाविभागः	,,	६१
आरम्भलक्षणम्	,,	६२
प्रयत्न	,,	६३
प्राप्त्याशा ,,	,,	,,
नियताप्ति ,,	८	६४
फलोदय ,,	,,	,,
अवान्तरसन्धिनिर्देशः	,,	६५
मुखसन्धिलक्षणम्	,,	६६
प्रतिमुख ,,	,,	,,
गर्भ ,,	,,	६७
निर्वहण ,,	,,	६८
मुखसन्धिः	८-९,	६९-७५
मुखसन्ध्यङ्गानि	८	६९
उपक्षेपलक्षणम्	,,	७१
उपक्षेपविभागः	,,	,,
परिकरलक्षणम्	,,	७२
परिन्यास ,,	९	७३
विलोभन ,,	,,	,,
युक्ति ,,	,,	,,
प्राप्ति ,,	,,	७४
समाधान ,,	,,	,,
विधान ,,	,,	,,
परिभावना ,,	,,	,,
उद्भेद ,,	,,	७५
भेद ,,	,,	,,
करण ,,	,,	,,
प्रतिमुखसन्धिः	९-१०,	७६-८३
प्रतिमुखसन्ध्यङ्गानि	९	७६
उपासनलक्षणम्	,,	७८
उपन्यास ,,	,,	,,
विलास ,,	,,	७९
शम	,,	,,
नर्म ,,	,,	८०
निरोध ,,	,,	,,
वर्णसंहार ,,	,,	८१
वज्र ,,	,,	,,
परिसर्प ,,	१०	८२
नर्मद्युति ,,	,,	,,
प्रपञ्चन ,,	,,	८३
विद्रुत ,,	,,	,,
गर्भसन्धिः	१०-११,	८४-९१
गर्भसन्ध्यङ्गानि	१०	८४
अभूताहरणलक्षणम्	,,	८६
मार्ग ,,	,,	,,
रूप	,,	८७
उदाहरण ,,	,,	,,
क्रम ,,	,,	८८
उद्वेग ,,	,,	,,
सङ्ग्रह ,,	,,	८९
आक्षेप ,,	,,	,,
सम्भ्रम ,,	,,	९०
अनुमान ,,	,,	,,
तोटक ,,	११	९१
अतिबल ,,	,,	,,

विषयः	पृष्ठम्	श्लोकः
अवमर्शसन्धिः ११-१२, ९२-१		
अवमर्शसन्ध्यङ्गानि	११	९२
अपवादलक्षणम्	,,	९४
सम्फेट ,,	,,	,,
विद्रव ,,	,,	९५
द्रव ,,	,,	,,
शक्ति ,,	,,	,,
द्युति ,,	,,	,,
प्रसङ्ग ,,	,,	९७
छलन ,,	,,	,,
व्यवसाय ,,	,,	९८
प्ररोचना ,,	,,	,,
विरोधन ,,	,,	९९
विचलन ,,	,,	,,
आदान ,,	१२	१००
निर्वहणसन्धिः १२-१३, १००-१०१		
निर्वहणसन्ध्यङ्गानि	१२	१००
सन्धिलक्षणम्	,,	१०१
प्रसाद ,,	,,	,,
प्रथन ,,	,,	१०४
विबोध ,,	,,	,,
आनन्द ,,	,,	१०५
निर्णय ,,	,,	,,
पूर्वभाव ,,	,,	१०६
उपसंहार ,,	,,	,,
परिभाषण ,,	,,	१०७
संभ्रम ,,	,,	,,
कार्यदृष्टि ,,	,,	१०८
अद्भुतप्राप्ति ,,	,,	,,
कृति ,,	,,	१०९
प्रशस्ति ,,	,,	,,
प्रकाशोपसंहारः	१२	१०९

विषयः	पृष्ठम्	श्लोक
द्वितीयः प्रकाशः ।		
वृत्तयः १३–१७, १–३७		
वृत्तिविभागः	१३	१
भारतीवृत्तिलक्षणम्	,,	२
सात्वती ,,	,,	३
कैशिकी ,,	१४	४
आरभटी ,,	,,	५
भारतीवृत्त्यङ्गानि	,,	६
प्ररोचनालक्षणम्	,,	८
सात्वतीवृत्त्यङ्गानि	,,	९
संलापकलक्षणम्	,,	१०
उद्घातक ,,	,,	११
सङ्घात्य ,,	,,	,,
परिवर्तक ,,	,,	१२
कैशिकीवृत्त्यङ्गानि	,,	,,
नर्मस्फिजलक्षणम्	१५	१३
नर्मगर्भ ,,	,,	१४
नर्मस्फोट ,,	,,	,,
नर्म ,,	,,	१५
नर्मविभागः	,,	१५-१९
वचःशुद्धनर्मलक्षणम्	,,	२०
रूपशुद्ध ,,	,,	२१
क्रियाशुद्ध ,,	,,	२२
वाचानुरागकथन ,,	१६	२३
वेषव्यक्तिकर ,,	,,	२४
चेष्टाव्यक्तिकर ,,	,,	२५
वागिच्छाप्रतिपादन ,,	,,	२६
रूपेच्छाकथन ,,	,,	२७
चेष्टास्पष्टीकरण ,,	,,	२८
वाग्भेदन ,,	,,	२९
भेदरूप ,,	,,	,,
क्रियाभेदन ,,	,,	३०

विषयः	पृष्ठम्	श्लोकः
वाग्भयलक्षणम्	१६	३
भीतिरूप ,,	,,	३१
चेष्टाभयकर ,,	,,	,,
वाग्भीत्यपरसंयोगि ,,	१७	३२
वेषभीत्यपराश्रयि ,,	,,	३३
चेष्टाभयान्यसंयोगि ,,	,,	३४
आरभटीवृत्त्यज्ञानि	,,	३५
संक्षिप्तिकालक्षणम्	,,	३६
सम्भेट ,,	,,	,,
वस्तुस्थापन ,,	,,	३७
पातन ,,	,,	,,

काव्यदोषाः १७–२२, ३८–८३

काव्यदोषविभागः	१७	३८	
पददोष ,,	१७-१८	३९–४२	
सम्बन्धहीनलक्षणम्	१८	४२	
दुर्बोध ,,	,,	४३	
अप्रसिद्ध ,,	,,	४४	
अनर्थक ,,	,,	४५	
गूढार्थ ,,	,,	४६	
क्लिष्टरहित ,,	,,	४७	
अप्रतीत ,,	,,	४८	
अवाचक ,,	,,	४९	
क्लिष्ट ,,	,,	५०	
म्लान ,,	१९	५१	
अपुष्टार्थ ,,	,,	५२	
असाधु ,,	,,	५३	
समयच्युत ,,	,,	५४	
अक्षमार्थान्तर ,,	,,	५५	
कष्ट ,,	,,	५६	
अप्रयुक्त ,,	,,	५७	
ससंशय ,,	,,	५८	

विषयः	पृष्ठम्	श्लोकः
निरुद्धार्थान्तरलक्षणम्	१९	५९
भ्रष्ट ,,	,,	६०
भ्रष्टविभागः	,,	,,
अपदार्थक ,,	२०	६१
ग्राम्य ,,	,,	,,
अस्तुत ,,	,,	६२
पर्यायज्ञापक ,,	,,	६३
देश्य ,,	,,	,,
असम्भाव्यार्थसाधक ,,	,,	६४
वाक्यदोषविभागः	,,	६६–६८
शब्दच्युतलक्षणम्	,,	६९
क्रमापेत ,,	,,	७०
अश्राव्य ,,	,,	,,
पुनरुक्तिमत् ,,	,,	७१
छन्दोभङ्गाकुल ,,	,,	,,
ग्राम्य ,,	२१	७२
व्याकीर्ण ,,	,,	,,
भग्नरीतिक ,,	,,	७३
यतिभग्नाश्रय ,,	,,	,,
न्यून ,,	,,	७४
अधिक ,,	,,	७५
वाक्यगर्भित ,,	,,	७६
विरुद्धसन्धि ,,	,,	,,
निस्सन्धि ,,	,,	७७
तुच्छार्थक ,,	,,	,,
अवाचक ,,	,,	७८
वाक्यार्थदोषविभागः	,,	७९–७९
औचित्यभङ्गलक्षणम्	,,	८०
सन्देह ,,	,,	८१
रीतिभङ्ग ,,	,,	,,
क्रमच्युति ,,	२२	८२
उपक्रमोपसंहारविषम ,,	,,	,,
दुष्टभूषण ,,	,,	८३
ग्राम्य ,,	,,	,,

विषयः	पृष्ठम्	श्लोकः
काव्यगुणाः	**२२**	**८४-९०**
काव्यगुणविभागः	२२	८४
श्लिष्टलक्षणम्	,,	८६
प्रसादलक्षणम्	,,	,,
समता ,,	,,	८७
मधुर ,,	,,	,,
सुकुमार ,,	,,	८८
अर्थव्यक्ति ,,	,,	,,
उदारत्व ,,	,,	८९
ओजो ,,	,,	,,
समाधि ,,	,,	९०
अलङ्काराः	**२३-३०**	**९१-१६१**
अलङ्कारविभागः	२३	९१
अपह्नुतिलक्षणम्	,,	९७
समासोक्ति ,,	,,	९८
समासोक्तिविभागः	,,	९९
उपमालक्षणम्	२४	१००
उपमाविभागः	,,	,,
पूर्णोपमालक्षणम्	,,	१०२
लुप्तोपमा	,,	,,
वाक्यार्थोपमा ,,	,,	१०३
दीपक ,,	,,	१०५
क्रियादीपक ,,	,,	१०६
कारकदीपक ,,	,,	१०७
मालादीपक ,,	,,	१०८
क्रम ,,	,,	१०९
विशेष ,,	२५	११०
रूपक ,,		
रूपकविभागः	,,	१११

विषयः	पृष्ठम्	श्लोकः
जातिलक्षणम्	,,	११२
जातिविभागः	,,	११३
उत्प्रेक्षालक्षणम्	,,	११४
व्याजवर्णन ,,	,,	११५
अप्रस्तुतस्तुति ,,	,,	११६
साम्य ,,	,,	११७
एकावलि ,,	,,	११८
विभावना ,,	२६	११९
आक्षेप ,,	,,	१२०
व्यतिरेक ,,	,,	१२१
व्यतिरेकविभागः	,,	१२२
श्लेषलक्षणम्	,,	१२३
श्लेषविभागः	,,	,,
अर्थान्तरलक्षणम्	,,	१२५
पर्यायोक्त ,,	,,	१२६
विरोध ,,	,,	१२७
सङ्गीर्ण ,,	२७	१२८
रसवत् ,,	,,	१२९
अतिशय ,,	,,	१३०
अत्युक्ति ,,	,,	,,
वक्रोक्ति ,,	,,	१३१
ध्वनि ,,	,,	,,
अन्योन्य ,,	,,	१३२
अनुमान ,,	,,	१३३
यथासङ्ख्य ,,	,,	१३४
चित्र ,,	,,	१३५
काव्यसारप्रशंसा	,,	१३६
प्रश्नोत्तरविभागः	,,	१३८
अन्तर्लापिलक्षणम्	२८	१३९
बहिर्लापि ,,	,,	१४०
त्रिभङ्गी ,,	,,	१४१
अन्तर्लापिविभागः	,,	,,
बहिर्लापि ,,	,,	१४२

विषयः	पृष्ठम्	श्लोकः
गुप्तोत्तरलक्षणम्	२८	१४४
साक्षस्च्युतक ,,	,,	१४५
एकालाप ,,	,,	१४६
द्विरभ्यास ,,	,,	१४७
अक्षरलोपक ,,	२९	१४८
गतप्रत्यागत ,,	,,	१४९
मिश्र ,,	,,	१५०
चक्रबन्ध ,,	,,	१५१
प्रसिद्धचक्रबन्धविभागः	,,	१५२
अक्षरलक्षणम्	,,	१५३
पद्धर ,,	,,	१५५
पद्मबन्ध ,,	३०	१६०
प्रकाशोपसंहारः	,,	२६२

तृतीयः प्रकाशः ।

लक्षणानि	३१-३३	१-२४
लक्षणविभागः	३१	१
भूषणलक्षणम्	,,	५
अक्षरावलि ,,	,,	,,
शोभा ,,	,,	
गुणकीर्तन ,,	,,	,,
निरुक्तविभागः	,,	
तथ्यलक्षणम् ,,	,,	,,
अतथ्य ,,	,,	,,
अभिमान ,,	,,	८
उदाहृति ,,	,,	,,
गुणानुवाद ,,	,,	९
प्रिय ,,	,,	,,
हेतु ,,	,,	१०
प्रोत्साहन ,,	,,	,,
सारूप्यलक्षणम्	३२	११
मिथ्याव्यवसाय ,,	,,	१२
सिद्धि ,,	,,	,,
दृष्टान्त ,,	,,	१३
आशीर् ,,	,,	,,
संशय ,,	,,	१४
कपट ,,	,,	,,
क्षमा ,,	,,	१५
अनुवृत्ति ,,	,,	,,
पदोच्चय ,,	,,	१६
आक्रन्द ,,	,,	१७
परिदेवन ,,	३२	१८
उपपत्ति ,,	,,	,,
याचन ,,	,,	१९
प्राप्ति ,,	,,	,,
मनोरथ ,,	,,	२०
युक्ति ,,	,,	,,
अतिशय ,,	३३	२१
पृच्छा ,,	,,	,,
आख्यान ,,	,,	२२
प्रतिषेध ,,	,,	,,
अनुमिति ,,	,,	२३
निर्भासन ,,	,,	२४
काकु ,,	,,	,,
पश्चात्ताप ,,	,,	,,

नाट्यव्यहारोपयोगि-परिभाषाः ३३-३८, २५-७९

आक्रीडादिनिर्देशः	३३	२५
आक्रीड इत्यस्य प्रतिपादनम्	,,	२०
देहली ,,	३४	२१
द्वजे ,,	,,	२२

विषयः	पृष्ठम्	श्लोकः
हला इत्यस्य प्रतिपादनम्	३४	३३
हीमाणहे ,,	,,	३१
सखी ,,	,,	३५
जोपट्टिकम् ,,	,,	३६
वरण्डी ,,	,,	३७
ही ,,	,,	३८
पुरोभाग ,,	,,	३९
जनान्तिकम् ,,	,,	४०
आकाशम् ,,	,,	४१
हन्त ,,	३५	४२
स्वगतम् ,,	,,	४३
प्रकाशम् ,,	,,	४४
स्वामी ,,	,,	४५
भावकः ,,	,	४६
ऊ ,,	,,	४७
राजन् ,,	,,	४८
भाव ,,	,,	४९
भगवन् ,,	,,	५०
अज्ज ,,	,,	५१
भट्टिणी ,,	,,	५२
गण्डिका ,,	,,	५३
ई ,,	,,	५४
शर्मन् ,,	,	५५
अम्महे ,,	,,	५६
रण्डा ,,	,,	५७
बाढम् ,,	३६	५८
आ ,,	,,	५९
भर्तृदारिका ,,	,,	६०
स्वामिनी ,,	,,	६१
आत्मगतम् ,,	,,	६२
कान्ते ,,	,,	,,
प्रिये ,,	,,	६३
हे मञ्जुभाषिणी ,,	३७	६४
आर्य ,,	,,	६५
देव ,,	,,	,,

विषयः	पृष्ठम्	श्लोक
विभो इत्यस्य प्रतिपादनम्	३७	६६
वत्स ,,	३७	६७
सारथिः ,,	,,	,,
सूतः ,,	,,	६८
दारिका ,,	,,	६९
हण्डः ,,	,,	,,
कुलपतिः ,,	,,	७०
वटुः ,,	,,	७१
सौदामिनी ,,	,,	,,
आम ,,	,,	७२
श्रावुत्तः ,,	,,	७३
भगवती ,,	,,	,,
अत्ता ,,	,,	,,
गुरुः ,,	,,	,,
नाद ,,	३८	७४
हञ्जे ,,	,,	७५
अज्जुका ,,	,,	७६
आयुष्मन् ,,	,,	,,
प्रथमः कल्पः ,,	,,	७७
विजया ,,	,,	७८
सार्थवाहकः ,,	,,	,,
प्रकाशोपसंहारः ,,		७९

चतुर्थः प्रकाशः ।

अङ्कावतारलक्षणम्	३९	१
शुद्धविष्कम्भ ,,	,,	२
सङ्कीर्णकविष्कम्भ ,,	,,	३
चूलिका ,,	,,	,,
नायिकाः	३९-४६,	४-४१
नायिकालक्षणम्	३९	४
नायिकाविभागः	,,	५
स्वकीयालक्षणम्	,,	,,
स्वकीयाविभागः	,,	६

विषयः	पृष्ठम्	श्लोकः
मुग्धालक्षणम्	३९	६
मध्यमाविभागः	४०	८
धीरमध्यालक्षणम्	,,	
स्वयं मध्या ,,	,,	
अधीरमध्या ,,	,,	१०
प्रगल्भाविभागः	,,	११
धीरप्रगल्भालक्षणम्	,,	१२
मध्यप्रगल्भा ,,	,,	१३
अधीरप्रगल्भा ,,	,,	१५
मध्यप्रगल्भायाः विभागः	,,	१६
अन्यनायिकालक्षणम्	,,	१७
समाननायिका ,,	४१	१८
नायिकावस्थाः	,,	२०
उत्कण्ठितालक्षणम्	,,	२१
विप्रलब्धा ,,	,,	२२
खण्डिता ,,	,,	,,
प्रोषितप्रिया ,,	,,	२३
स्वाधीनपतिका ,,	,,	,,
अश्लिष्टा ,,	,,	२४
वाससज्जा ,,	,,	,,
अभिसारिका ,,	,,	२५
दूत्यः	४१-४२	२५-२८
दूतीविभागः	४१	२५
दासी इत्यस्य प्रतिपादनम्	,,	२६
सखी इत्यस्य प्रतिपादनम्	,,	,,
कारुः ,,	४२	२७
धात्रेयी ,,	,,	,,
प्रातिवेशिका ,,	,,	,,
लिङ्गिनी ,,	,,	२८
शिल्पिनी ,,	,,	,,
स्वयं ,,	,,	,,

विषयः	पृष्ठम्	श्लोकः.
नायिकानां सात्विक-		
वस्थाः	४२-४३	२९-४१
भावः इत्यस्य प्रतिपादनम्	४२	३२
हावः ,,	,,	,,
हेला ,,	,,	,, ३३
शोभा	,,	,,
कान्तिः ,,	,,	,, ३४
दीप्तिः ,,	,,	,,
माधुर्यं ,,	,,	,, ३५
प्रागल्भ्यं ,,	,,	,,
औदार्यं ,,	,,	,, ३६
धैर्यं ,,	,,	,,
लीला ,,	४३	३७
विलासः ,,	,,	,,
विच्छित्तिः ,,	,,	,, ३८
,,	,,	,,
,,	,,	,, ३९
मोट्टायितम् ,,	,,	,,
कुट्टमितम् ,,	,,	४०
बिब्बोकः ,,	,,	,,
ललितम् ,,	,,	४१
गतिः ,,	,,	
नायकाः	४३-४६	४२-६०
नायकलक्षणम्	४३	४१
नायकाविभागः	,,	४४
धीरललितलक्षणम्	,,	४५
धीरशान्त ,,	,,	४६
धीरोदात्त ,,	४४	४७
धीरोद्धत ,,	,,	४८
शृङ्गारनायकाविभागः	,,	४९

विषयः	पृष्ठम्	श्लोकः
नायकलक्षणम्	,,	५०
क्षिण ,,	,,	,,
ाठ ,,	,,	५१
ष्ट ,,	,,	,,
ारनायकविभागान्तरम्	४४	५३
ायकस्य सात्त्विकगुणाः	,,	५४
शोभालक्षणम्	,,	५५
विलास ,,	,,	५६
माधुर्य ,,	,,	५७
गाम्भीर्य ,,	४५	५८
स्थैर्य ,,	,,	५९
तेजो ,,	,,	६०
ललित ,,	,,	,,
औदार्य ,,	,,	६१
ायकसहायादयः	४५-४६,	६१-७०
ायकसहायविभागः	४६	६१
ाकानायकलक्षणम्	,,	६२
ठिमर्द ,,	,,	,,
ेट ,,	,,	६३
ेवूषक ,,	,,	,,
ातिनायक ,,	,,	६४
परिच्छदनायकनिरूपणम्	४६	६५
ाधाप्रयोगावस्था	४६	७१
ष्टास्यलक्षणम्	४७	८४
ेशक ,,	,,	८५
काोपसंहारः	,,	८६

पञ्चमः प्रकाशः ।

ाकुः	४८	१
ाकुविभागः	,,	,,
ाकाक्षाकाकुलक्षणम्	,,	,,
राकाङ्क्ष ,,	,,	२

विषयः	पृष्ठम्	श्लोकः
रसलक्षणम्	,,	३
विभाव ,,	,,	४
अनुभाव ,,	४८	५
सात्त्विकभाव ,,	,,	६
सात्त्विकभावविभागः	४९	८
स्तम्भलक्षणम्	,,	९
प्रलय ,,	,,	,,
रोमाञ्च ,,	,,	१०
स्वेद ,,	,,	,,
वैवर्ण्य ,,	,,	,,
वेपथु ,,	,,	,,
अश्रु ,,	,,	११
वैस्वर्य ,,	,,	१२
सात्त्विकत्वनिर्वचनम्	,,	१२
व्यभिचारिभावः	४९-५४,	१२-१६
व्यभिचारिणां व्यभिचारित्वनिर्वचनम्	४९	१२
व्यभिचारिभावविभागः	,,	१३
निर्वेदलक्षणम्	,,	१४
ग्लानि ,,	,,	१७
चिन्ता ,,	५०	१९
असूया ,,	,,	२०
मद ,,	,,	२१
मोह ,,	,,	२१
मति ,,	,,	२५
श्रम ,,	,,	२६
शङ्का ,,	,,	२८
धृति ,,	,,	२९
स्मृति ,,	५१	२५
व्याधि ,,	,,	३२
वितर्क ,,	,,	३३
उन्माद ,,	,,	३७
दैन्य ,,	,,	३८
आवेग ,,	,,	३७

विषयः	पृष्ठम्	श्लोकः
आलस्यलक्षणम्	५२	४१
त्रास ,,	,,	४२
व्रीडा ,,	,,	४४
अमर्ष ,,	,,	४९
उग्रता ,,	,,	४७
स्मय ,,	,,	४८
जडता ,,	,,	५०
मरण ,,	,,	५१
निद्रा ,,	५३	५३
विषाद ,,	,,	५४
औत्सुक्य ,,	,,	५६
विभ्रम ,,	,,	५७
अपस्मार ,,	,,	५९
अवहित्थ ,,	,,	६०
आलस्य ,,	,,	६१
प्रबोध ,,	,,	६३
हर्ष ,,	५४	६५
स्थायिभावः	,,	६६
स्थायिलक्षणम्	,,	,,
स्थायिनो रसत्वकथनम्	,,	६७
निर्वेदादेः स्थायित्वखण्डनपूर्वकं स्थायिविभागः	,,	६९
काव्यस्य रसेन सम्बन्धः	,,	७१
नर्तके स्वादानुवादः	५५	७३
स्वादलक्षणम्	,,	,,
स्वादविभागः	,,	७४
शृङ्गारः	५५-५६,	६५-९७
रतिलक्षणम्	५५	७६
शृङ्गार ,,	,,	७७
शृङ्गारपोषकभावाः	५९	७८
शृङ्गारविरोधिभावाः	,,	,,
शृङ्गारविभागः	,,	७९
असम्भवलक्षणम्	,,	,,
असम्भवावस्थाविभागः	,,	८०
संस्मृतिलक्षणम्	,,	८१
उद्वेग ,,	,,	,,
अभिलाष ,,	५६	८३
प्रलाप ,,	,,	,,
उन्माद ,,	,,	८४
व्यज्वर ,,	,,	,,
चिन्ता ,,	,,	८५
गुणाख्यान ,,	,,	८५
जडता ,,	,,	८६
मरण ,,	,,	,,
वियोगलक्षणम्	,,	८७
वियोगविभागः	,,	,,
मानलक्षणम्	,,	८८
मानकारणानि	,,	,,
माने षड्उपायाः	,,	९०
नामलक्षणम्	,,	९१
मद ,,	,,	,,
दान ,,	,,	९२
नति ,,	,,	,,
उपेक्षा ,,	,,	,,
रसान्तर ,,	,,	९३
प्रणयमान लक्षणम्	,,	,,
प्रवास ,,	,,	९४
प्रवासविभागः	,,	,,
प्रवासानुभावविशेषाः	,,	,,
प्रवासस्य विभागान्तरम्	५७	९५
सम्भोगलक्षणम्	,,	९६
वीररस ,,	,,	९७

विषयः	पृष्ठम्	श्लोकः
बीभत्स लक्षणम्	५७	५५
रौद्र ,,		१००
हास ,,	,,	१०१
हासविभाग	,,	,,
स्मितलक्षणम्	,,	१०२
हसित ,,	,,	,,
विहसित ,,	,,	१०३
उपहास ,,	,,	
अपहास ,,	,,	
अतिहास ,,	,,	
अद्भुतलक्षणम्	५८	१०५
भयानक ,,		१९६
करुण ,,	,,	१०७
रसानां वर्णदेवतावृत्तयः	,,	१०९
शान्तलक्षणम्	५९	११५
धर्म ,,	,,	११६
धन ,,	,,	,,
काम ,,	,,	११७
मोक्ष ,,	,,	११८
उदर्कप्रीति ,,	,,	११९
हीननाटक ,,	,,	१२०
उत्तमनाटक ,,	,,	,,
प्रकाशोपसंहारः	,,	१२१

षष्ठः प्रकाशः

नाटिकम्	६०	१
प्रकरणम्	६१	१२
सट्टकम्	,,	१२
माणम्	,,	२४
ईहामृगः	,,	२७
वीथी	,,	३१
वीथ्यङ्गानि	,,	३३
वीथ्यङ्गविभागः	,,	,,
डवलक्षणम्	,,	१५
प्रपञ्च ,,	,,	,,
त्रिगत ,,	,,	१६
वाक्केलि ,,	,,	
गण्ड ,,	,,	
नालिका ,,	,,	,,
उद्घात्य ,,	,,	१८
अवलगित ,,	,,	३९
व्याहार ,,	,,	४०
अधिबल ,,	,,	
अवस्यन्दित ,,	,,	४१
नवव ,,	,,	,,
अवस्यन्दित ,,	,,	४२
व्यायोगः	६४	४३
समवकारः	,,	४५
डिमः	,,	५३
ईहामृगः	,,	५४
डिम.	,,	६०
उपसंहारः	६६	६५

॥ श्रीः ॥

सर्वेश्वरार्यविरचितः

॥ साहित्यसारः ॥

प्रथमः प्रकाशः ।

मङ्गलाचरणम् ।

सुरासुरशिरःश्रेणीरत्नराजिनिराजितम् ।
वन्देऽहं वासुदेवाङ्घ्रिपद्मकल्पद्वयम् ॥ १ ॥

उपोद्घातः ।

सदा मृदुपदन्यासाः सालङ्कारा रसावहाः ।
प्रगल्भा इव कामिन्यो जयन्त्यादिकवेर्गिरः ॥ २ ॥

जयन्ति भुवने सन्तः सदा सन्तापहारिणः ।
निजवक्त्रेन्दुनिर्गच्छद्वाक्यामृतदवैः ॥ ३ ॥

विनापि कारणेनोच्चैर्विसरद्भैरदारुणात् ।
दुर्जनाद् भीतिरत्यर्थं कस्य वा नोपजायते ॥ ४ ॥

अशेषख्यातसाहित्यसारनिष्णातमानसः ।
सर्वेश्वर इति ख्यातः कविर्जयति भूतले ॥ ५ ॥

मनोमन्दरमन्थानमथिताद् भरताम्बुधेः ।
यस्याजनि जनानन्दी ज्ञानामृतमहोदयः ॥ ६ ॥

१. T₀ भारताम्बुधेः,

मनःकुवलयोल्लासकरीयं तिमिरापहा ।
यद्वक्त्रचन्द्रसम्भूता भारती चन्द्रिकायते ॥ ७ ॥

निश्शेषजगदानन्दसन्दोहमुदिताशयः ।
यस्यागस्त्येश्वराधीशो वामराशेर्मुनिर्गुरुः ॥ ८ ॥

उत्तुङ्गसत्त्वगम्भीरादुत्पन्नो यस्त्रिविक्रमात् ।
सन्मध्यविलसन्मूर्तिः सागरादिव चन्द्रमाः ॥ ९ ॥

गङ्गातरङ्गनिर्धौतजटामकुटशोभितः ।
यस्य चेतस्यसावास्ते सदारश्चन्द्रशेखरः ॥ १० ॥

लसन्मृदुपदावल्या बालव्युत्पत्तिकारणम् ।
तेन साहित्यसारोऽसौ क्रियते नाट्यलक्षणम् ॥ ११ ॥

नाट्यकर्तृप्रयोक्तृप्रेक्षकलक्षणम् ।

आहृतं भरतात् किञ्चिदुत्तरात्किञ्चिदुद्धृतम् ।
कलितं कोहलात् किञ्चिन् किञ्चिद् भरतविस्तरात् ॥ १२॥

शास्त्रमेतदनालोच्य स्वबुद्ध्या नाटकादिषु ।
पद्यं वा पदमेकं वा यः करोति स मन्दधीः ॥ १३ ॥

यः शब्दशास्त्रनिर्वृत्तः स्वभावविशदाशयः ।
भरतादिषु निष्णातः स हि साहित्यपण्डितः ॥ १४ ॥

अशास्त्रज्ञः प्रयोक्ता च प्रेक्षावानपि कोविदैः ।
अस्य तन्त्रस्य तत्त्वज्ञैर्निर्लज्ज इति कथ्यते ॥ १५ ॥

१. T_1 सनत, T_3 लसत् for मनः.
२. T_3 यस्यागस्त्ये वराधीशो.
३. T_3 अनालोड्य.
४ $T_{1.6}$ मूढधीः.
५. $T_{1.2}$ M शब्दशास्त्रनिशितस्वभाव.

अभियोगाभिभूतात्मा रसभावविभावकः ।
पठिताशेषभरतः प्रयोक्ता भरतोदितम् ॥ १६ ॥

गुणागुणगणाशेषपरीक्षाप्रवणाशयैः ।
शास्त्रमेतदशेषेण बोद्धव्यं प्रेक्षकैरपि ॥ १७ ॥

वस्तुनस्तत्त्वमास्थाय तन्मयत्वेन भावकः ।
सुप्रसन्नाशयः प्रोक्तः प्रेक्षको नाट्यकोविदैः ॥ १८ ॥

नाट्यभेदाः ।

नाट्यं दशविधैर्भेदैर्भिन्नं संज्ञासमन्वितैः ।
तानेकपदाकारनिरुक्त्यैव वदाग्यहम् ॥ १९ ॥

नाटकं सप्रकरणं भाणेहामृगवीथयः ।
व्यायोगः समवाकारः साङ्कं प्रहसनं डिमः ॥ २० ॥

नाटकप्रशंसा ।

अन्येषां प्रकृतित्वेन निश्शेषैर्लक्षणैः सह ।
तत्र नाटकमाचार्यैरादावेव विचार्यते ॥ २१ ॥

नटानामिदमित्याहुर्नाटकं वा विचक्षणाः ।
चत्वारो ब्रह्मणः पुत्राः नटास्तु भरतादयः ॥ २२ ॥

एषां नामभिरेवैताश्चतस्रो वृत्तयः स्मृताः ।
सर्वविद्यानिधिर्नाट्यमिति नाट्यविदो विदुः[1] ॥ २३ ॥

षट्सहस्रीकृताप्येतदेवमेवोदितं यथा ।
न सा विद्या न तच्छिल्पं न तज्ज्ञानं न सा क्रिया ॥ २४ ॥

१. M gives the variant विधि for निधि.

नासौ कला न तद् गोप्यं नाटके यन्न दृश्यते ।

नाटकलक्षणम् ।

नान्दीप्रस्तावनावस्तुबीजबिन्दुविभूषितम् ॥ २५ ॥

सन्धिसन्ध्यङ्गसहितं साङ्गवृत्तिसमन्वितम् ।
निश्शेषदूषणापेतमाविष्कृताद्भुतविभूषणम् ॥ २६ ॥

अशेषलक्षणोल्लासि भाषासङ्केतभूषितम् ।
अङ्कावतारविष्कम्भचूलिकाभिरलङ्कृतम् ॥ २७ ॥

नायिकानायकानेकपरिवारजनावृतम् ।
वाद्ययोगगुणाङ्कास्यप्रवेशैश्च निरन्तरम् ॥ २८ ॥

सकाकुरसगर्भाङ्गं चतुर्वर्गफलाश्रयम् ।
सर्वप्रीतिकरोत्कृष्टं विज्ञेयं नाटकं बुधैः ॥ २९ ॥

नान्दी

नन्दी वृषो वृषाङ्कस्य जगदादौ जगत्पतेः ।
नृत्यतः कल्पनायोगाज्जगाम किल रञ्जताम् ॥ ३० ॥

तस्य तद्रङ्गसम्बद्धा यां पूजा क्रियते जनैः ।
नाटके नाट्यतत्त्वज्ञैः सा नान्दीत्यभिधीयते ॥ ३१ ॥

या पूर्वरङ्गसम्बद्धा द्वाविंशत्यङ्गवर्त्तिनी ।
सभ्यान् नन्दयतीत्येवं सापि नान्दी निगद्यते ॥ ३२ ॥

कविभावकशैलूषैरशेषैर्नाटकादिषु ।
क्रियते सा यथासङ्ख्यं वाङ्मनःकायकर्मभिः ॥ ३३ ॥

१. T_1—3 कला नासौ.
२. T_3 हास्यं for गोप्यं.
३ T_1 फलप्रदं.
४. M T_2 पूजा या.

प्रथमः प्रकाशः ।

प्रस्तावना ।

सूक्तिमुद्राकलापेन सूत्रिणैकत्र वस्तुनः ।
क्रियते सूचना नाट्ये या सा प्रस्तावना स्मृता ॥ ३४ ॥

आमुखस्थापनाभेदात् सा पुनर्द्विविधा भवेत् ।
सूत्रधारो नटीयुक्तो वस्तुप्रस्तावनाविधिम् ॥ ३५ ॥

कुरुते यत्र सद्वृत्तैस्तदामुखमुदाहृतम् ।
पारिपार्श्वकसंयुक्तो वा विदूषकसंयुतः ॥ ३६ ॥

वस्तु विस्तारयेत् सूत्री यत्र सा स्थापना स्मृता ।
तत्रैवं विधिरादिष्टो गुरुभिस्तत्त्ववेदिभिः ॥ ३७ ॥

पूर्वरङ्गं विधायादौ साङ्गं रङ्गव्यवस्थिते ।
कृतसादस्यसत्कारे सूत्रधारे कुलालयौ ॥ ३८ ॥

तद्वन्नटः प्रविश्यान्यः शुक्लाम्बरधरः शुचिः ।
काव्यमास्थापयेदाशु सविशेषगुणाश्रयम् ॥ ३९ ॥

दैविकं दैविको भूत्वा मानुषं मानुषाकृतिः ।
तयोरन्यतरो भूत्वा मिश्रीभूतमपश्रमः ॥ ४० ॥

सूचयेत् स्वगिरा साधु प्रोद्भिद्यदमृतश्रिया ।
सबीजं वस्तु वा तत्र मुखं वा पात्रमेव वा ॥ ४१ ॥

अनवद्यपदैः पद्यैः सद्यः सभ्यान् [3]प्रसादयन् ।
ऋतुमासाद्य यं कञ्चिद् भारतीं वृत्तिमाश्रयेत् ॥ ४२ ॥

भारती तु यथायोगं स्वप्रसङ्गेऽभिधास्यते ।
सर्वमुक्त्वाथ वक्तव्यमन्ते प्रस्तावनाविधेः ॥ ४३ ॥

१. T_1. 3 सूत्रिणैकेन, T_2 सूत्रिणैकस्य.
२. P commences only from here.
३. P T_3 प्रसादयेत्.

सूत्रधारः स्वयं गच्छेदागच्छत्पात्रमन्तिके ।
सूचितं ध्रुवया गीत्या श्रुत्वा स्मृत्वा समीक्ष्य वा ॥ ४४ ॥

वस्तु ।

नाटके नायकादीनां कथा वस्त्वभिधीयते ।
मुख्यामुख्यप्रभेदेन तदत्र द्विविधं स्मृतम् ॥ ४५ ॥

तत्र नेतृकथा मुख्यममुख्यमितरद् भवेत् ।
तदमुख्यमपि त्रेधा वस्तु सर्वत्र नाटके ॥ ४६ ॥

पताकाप्रकरीयुक्तपताकास्थानयोगतः ।
नायकस्य कथामध्ये तत्समानस्य या कथा ॥ ४७ ॥

आफलोदयमाबद्धा सा पताकेति कथ्यते ।
येन केनाप्यनल्पेन हेतुना पूर्वमुद्गतम् ॥ ४८ ॥

पश्चान्न दृश्यते यत्तु तद्वस्तु प्रकरी भवेत् ।
अतीतानागते कार्ये कथ्येते यत्र वस्तुनः ॥ ४९ ॥

अन्यापदेशव्याजेन पताकास्थानकं तु तत् ।
सदसन्मिश्रभेदेन सर्वमेतत् त्रिधा भवेत् ॥ ५० ॥

इतिहासादिसम्भूतं सादित्यभिमतं सताम् ।
असदित्युच्यते सर्वैः स्वबुद्ध्या कविकल्पितम् ॥ ५१ ॥

अन्यदन्योन्यसम्भिन्नं मिश्रमित्यभिधीयते ।
द्विधा विभागः कर्तव्यः सर्वस्यापीह वस्तुनः ॥ ५२ ॥

दृश्यश्रव्यं सूचनीयमिति सञ्चिन्त्य योग्यताम् ।
गीतरूपगुणोपेतं दृश्यश्रव्यमुदाहृतम् ॥ ५३ ॥

नीरसं लौकिकापेतमशास्त्रीयञ्च यद् भवेत् ।
तद् वस्तु सूचनीयं स्यादत्र विष्कम्भकादिभिः ॥ ५४ ॥

T_1 पताकेत्यभिधीयते.

साहित्यसारतत्त्वज्ञः स्थाने स्थाने पुनः पुनः ।
वस्तुमध्ये पृथक् कृत्वा वस्तुविस्तरहेतवे ॥ ५५ ॥

चतुष्पष्टयङ्गकार्याणि षडेतानि निवेशयेत् ।
अभिप्रेतस्य रचना गोप्यस्य परिगोपनम् ॥ ५६ ॥

प्रकाशन प्रकाश्यस्य रागसम्पादनादयः ।
प्रयोगस्य चमत्कारो वृत्तान्तस्यानुपक्षयः ॥ ५७ ॥

एतैरलङ्कृतं काव्यं संचेतोहारिता व्रजेत् ।

बीजम् ।

धर्मप्रभृतिकार्यस्य सूनिबद्धस्य नाटके ॥ ५८ ॥
मन्दमन्दोदितो हेतुर्बीजमित्यभिधीयते ।

बिन्दुः ।

अवान्तरार्थकार्यस्य प्रस्तुतार्थानुयायिनः ॥ ५९ ॥
सद्यः सम्बन्धविच्छेदे बिन्दुरुच्छेदकारणम् ।

सन्धयः ।

प्रकृतार्थप्रकृतयः पञ्चावस्थाभिरन्विताः ॥ ६० ॥

भरतादिभिरादिष्टा मुखाद्याः पञ्च सन्धयः ।
आरब्धस्येह कार्यस्य पञ्चावस्थाः प्रकीर्तिताः ॥ ६१ ॥

आरम्भयत्नप्राप्त्याशानियताप्तिफलोदयाः ।
आरम्भस्तद्गता वाञ्छा चाफलोदयनिर्भरा ॥ ६२ ॥

प्रयत्नस्तदलाभेन व्यापारातिशयो महान् ।
सम्पदापत्तिसमायोगात् प्राप्त्याशा तदसम्भवा ॥ ६३ ॥

१. P T_3 विस्तार.
२. P T_3 सर्वंदो हारिता.
३. M बन्धिबद्धस्य.

अपायाभावविभवान्नियताप्तिस्तदागमः ।
समस्तफलनिष्पत्तिर्निरवद्या फलोदयः ॥ ६४ ॥

मुखं प्रतिमुखं गर्भस्सावमर्शोपसंहृतिः ।
पूर्वमत्र विनिर्दिष्टास्त इमे पञ्च सन्धयः ॥ ६५ ॥

बीजोत्पत्तिर्मुखं नानाभावार्थरससम्भवा ।
दृश्यादृश्यसमुद्भेदस्तस्य प्रतिमुखं भवेत् ॥ ६६ ॥

अस्तव्यस्तस्य सर्वत्र गर्भस्थस्य गवेषणम् ।
छलादवमृशेद् यत्र व्यसनाद् वा विलोभनात् ॥ ६७ ॥

गर्भस्थगितबीजार्थस्सोऽवमर्शस्मृता मतः ।
मुखादयस्त्वनेकार्था बीजेनैतस्ततः कृताः ॥ ६८ ॥

एकत्वं यत्र नीयन्ते तत्तु निर्वहणं भवेत् ।

मुखसन्ध्यङ्गानि

मुखस्य द्वादशाङ्गानि कथ्यन्ते तानि नामतः ॥ ६९ ॥

उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिप्राप्तिसमाधानविधानपरिभावनाः ॥ ७० ॥

उद्भेदो भेदकरणे लक्षणन्त्वभिधीयते ।
बीजन्यासविधिस्तज्ज्ञैरुपक्षेप इति स्मृतः ॥ ७१ ॥

शब्दार्थभेदसंयोगवशात सोऽपि द्विधा भवेत् ।
तद्व्याप्तिगुणवाहुल्यं सर्वं परिकरं विदुः ॥ ७२ ॥

---

१ P T_3 भावोत्थ·
२ M T_1 सोपक्षेपः·

तस्य निष्पत्तिसौन्दर्यं परिन्यासोऽभिधीयते ।
विलोभनं गुणाख्यानं युक्तिरर्थावधारणम् ॥ ७३ ॥

प्राप्तिस्सुखागमोल्लासः[1] **समाधानं** प्रियोदयः ।
विधानं सुखदुःखाप्तिर्विस्मयः[2] परिभावना ॥ ७४ ॥

उद्भेदो गूढनिर्भेदो **भेदो** लोभकरं वचः ।
करणं प्रकृतारम्भो मुखाङ्गानि गतान्यथ ॥ ७५ ॥

प्रतिमुखसन्ध्यङ्गानि ।

वक्ष्ये प्रतिमुखाङ्गानि प्रसिद्धानि त्रयोदश ।
उपासनमुपन्यासविलासौ शमनर्मणी ॥ ७६ ॥

निरोधवर्णसंहारौ सवज्रः परिसर्पकः ।
नर्मद्युतिप्रगयणे विधूतं पुष्पमेव च ॥ ७७ ॥

उपासनमुपास्यानां विषयेष्वुपसेवनम् ।
उपन्यास इति प्रोक्ता सोपाया वाक्यसङ्गतिः ॥ ७८ ॥

रत्युत्कर्षो **विलासः** स्यादाङ्गिको वाथ मानसः ।
शमः प्रियजनोद्भूतमनोदुःखपरिक्षयः ॥ ७९ ॥

उपहासाय रचिता **नर्म** वाणी निगद्यते ।
निरोधो हितरोधः स्यादनिष्टक्रोधसमुद्भवः ॥ ८० ॥

सर्ववर्णोपगमनं **वर्णसंहार**[3] इष्यते ।
अत्यर्थनिष्ठुरं वाक्यं प्रत्यक्षं वज्रमुच्यते ॥ ८१ ॥

---

१. P T3 सुखागमः प्रोक्तः.
२. P T3 सुखदुःखैक्यम् .
३. P T3 उच्यते.

परिसर्पो मवेद् भूयो भूयो बीजानुसर्पणम् ।
प्रीतिर्नर्मद्युतिः प्रोक्ता सरसा नर्मसम्भवा ॥ ८२ ॥

बुद्धिः प्रगयणं वस्तुन्याबद्धा परमार्थतः ।
विधूतमरतिः प्रोक्ता पुष्पं स्याद् वागुदारता ॥ ८३ ॥

गर्भसन्ध्यङ्गानि ।

अङ्गानि द्वादशोच्यन्ते गर्भसन्धेरतः परम् ।
अ(द्भु ? भू)ताहरणं मार्गरूपोदाहरणक्रमाः ॥ ८४ ॥

उद्वेगसङ्ग्रहाक्षेपसम्भ्रमाः सानुमास्तथा ।
तोटकातिबले चैव लक्षणं सम्प्रणीयते ॥ ८५ ॥

अ(द्भु ? भू)ताहरणं सद्भिः कथ्यते छद्मचेष्टितम् ।
तत्त्वसङ्कीर्तनोल्लासो मार्ग इत्यभिधीयते ॥ ८६ ॥

वितर्कसंयुतं वाक्यं रूपके रूपमुच्यते ।
यदर्थोत्कर्षवद् वाक्यं तदुदाहरणं स्मृतम् ॥ ८७ ॥

मनसा चिन्त्यमानस्य प्राप्तिरेव क्रमो मतः ।
अरिभिः क्रियमाणा या भीतिः सोद्वेग [1]इष्यते ॥ ८८ ॥

संग्रहः कथ्यते साद्भिः सामदानोचितं वचः ।
गर्भबीजसमुद्भेदः सद्भिराक्षेप इष्यते ॥ ८९ ॥

भियश्चकासमुद्भूतिः संभ्रमः परिकीर्त्यते ।
अभ्यूहश्चेष्टिताकारैरनुमानमुदाहृतम् ॥ ९० ॥

---

१. P T3 उच्यते.

संरब्धवचनं प्राज्ञैर्नाट्ये तोटकमुच्यते ।
अतिसन्धानमाचार्या नाटकेऽतिबलं विदुः ॥ ९१ ॥

अवमर्शसन्ध्यङ्गानि ।

अवमर्शस्य यान्यङ्गान्याहुस्तानि वदाम्यहम् ।
अपवादोऽथ सम्फेटो विद्रवद्रवशक्तयः ॥ ९२ ॥

द्युतिप्रसङ्गच्छलनव्यवसायाः प्ररोचना ।
विरोधनं विचलनमादानञ्च त्रयोदश ॥ ९३ ॥

दोषप्रख्यापवादः स्यान्निर्दोषस्येतरस्य वा ।
रोषेण परुषाकारं सम्फेटः कटुभाषणम् ॥ ९४ ॥

बधबन्धादिदुःखानि[1] नाटकादिषु विद्रवः ।
द्रवस्त्वमर्षसम्भूता गुरुवर्गातिरस्कृतिः ॥ ९५ ॥

क्षमातिरस्कृतो रोषः शक्तिरित्यभिधीयते ।
शत्रुभिः क्रियमाणे द्वे तर्जनोद्वेजने[2] द्युतिः ॥ ९६ ॥

अन्येषां पुरतः प्रीत्या प्रसङ्गो गुरुकीर्तनम् ।
छलनं प्राहुरन्यैस्तु क्रियमाणावधीरणम् ॥९७ ॥

व्यवसायः स्वशक्त्युक्तिः पुरतः कस्यचित् कृता ।
प्ररोचना स्याद् भणितिरभूतस्यापि भूतवत् ॥ ९८ ॥

संरब्धवचनोल्लासो विरोधनमिति स्मृतम् ।
सद्भिर्विचलनं प्रोक्तं नृणामात्मविकत्थना ॥ ९९ ॥

---

१. T2 बन्धानि.
२. M P T1-2 उत्तेजने.

शक्त्या शक्तिमतः प्रोक्तमाद्यानं कार्यसङ्ग्रहः ।

निर्वहणसन्ध्यङ्गानि ।

ततो निर्वहणस्याद्य कथ्यन्तेऽङ्गानि विस्तरात् ॥ १०० ॥

सन्धिप्रसादग्रथनवि(रो ? बो)धानन्दनिर्णयाः ।

पूर्वभावोपसंहारपरिभाषणसंश्रयाः ॥ १०१ ॥

कार्यदृष्ट्यद्भुतप्राप्तिकृतयः सप्रशस्तयः ।

चतुर्दशैतान्युच्यन्ते लक्षणानि यथाक्रमम् ॥ १०२ ॥

बीजप्रापणमेवात्र सन्धिरित्यभिधीयते ।

प्रीत्युत्कर्षः प्रसादो वा विषयेषूपसेवनम् ॥ १०३ ॥

ग्रथनं कथ्यतेऽस्माभिः[1] कार्यस्यान्वेषणक्रमः ।

मन्तव्यस्तस्य कार्यस्य वि(रो ? बो)धोऽन्वेषणं भवेत् ॥ १०४

वाञ्छिताशेषसंसिद्धिरानन्दो विदुषां मतः ।

उद्भूतवस्तुकथनं निर्णयः परिभाषितः ॥ १०५ ॥

अभिप्रेतार्थसंसिद्धिः पूर्वभावोऽभिधीयते ।

सम्यक् समाप्तिः काव्यानामुपसंहार उच्यते ॥ १०६ ॥

परस्परकृता सूक्तिः परिभाषणमुच्यते ।

अद्भुतावाप्तिरधिका संश्रयः कथ्यते बुधैः ॥ १०७ ॥

एकत्वं कार्यदृष्टिस्तु समस्तस्यापि वस्तुनः ।

उपपन्नेतरप्राप्तिरद्भुतप्राप्तिरुच्यते ॥ १०८ ॥

कृतिर्लब्धार्थसंरक्षा[3] प्रशस्तिः शुभशंसनम् ।

१. T1-2 सद्भिः for अस्माभिः.
२. P T3 परस्परागता सूक्तिः.
३. T1-3 लब्धार्थसंरक्षा.

सन्ध्यङ्गषष्टिरियमिष्टरसाभिपुष्टा
विस्पष्टवाक्यमधिका च चतुष्टयेन ।
विद्वन्मनोनिकररञ्जनतत्परेण
सर्वेश्वरेण [1]रचिता [2]कविपुङ्गवेन ॥ १०९ ॥

[3]इति श्रीमन्मलयजमहापण्डितसर्वेश्वराचार्यविरचिते
साहित्यसारे प्रथमः प्रकाशः ।

द्वितीयः प्रकाशः ।

[4]सार्धमत्रैरनेकार्थैः कथ्यन्ते वृत्तयोऽधुना ।
भारती सात्वती चैव कैशिक्यारभटी तथा ॥ १ ॥

[5]नाटकोत्कर्षविषये चतस्रो वृत्तयः स्फुटाः ।
हृद्यसंस्कृतभूयिष्ठश्चित्राकारो नराश्रयः ॥ २ ॥

उल्लासः कोऽपि वचसां भारतीत्युच्यते बुधैः ।
व्यापारातिशयः कोऽपि नेतुस्त्यागदयाधिकः ॥ ३ ॥

१. T1 मुनिना for रचिता.
२. P T3 यतिपुङ्गवेन.
३. P T3 इति साहित्यसारे प्रथमः प्रकाशः.
४. P भरताचार्याय नमः । सार्धं.
५. P T3 अनेकार्थाः.
६. M P T3 नाटकोत्कर्षभेदाय.

निश्शोकः सत्वसम्पन्नः सात्वतीति निगद्यते ।
मृदुः शृङ्गारसंवृत्तो नृत्तगीतमनोहरः ॥ ४ ॥

कामभोगैकनिरतो व्यापारः कैशिकी स्मृता ।
मायेन्द्रजालसंग्रामक्रोधव्यापि विचेष्टितम् ॥ ५ ॥

वृत्तिमारभटीमाहुर्नाट्यतत्त्वविचक्षणाः ।

भारतीवृत्त्यङ्गानि ।

भारत्यङ्गानि चत्वारि वीथीप्रहसनामुखे ॥ ६ ॥

प्ररोचना च तत्राद्ये स्वप्रसङ्गे भविष्यतः ।
पूर्वमेवामुखं प्रोक्तं भेदे प्रस्तावनाविधेः ॥ ७ ॥

प्ररोचना तदस्माभिर्लक्षणेन प्रदर्श्यते ।
नटनाटकनेतॄणां कर्तुः सभ्यजनस्य च ॥ ८ ॥

उन्मुखीकरणं रङ्गे प्रशंसातः प्ररोचना ।

सात्त्वतीवृत्त्यङ्गानि ।

सात्त्वत्यङ्गानि चत्वारि वक्तव्यानि सलक्षणम् ॥ ९ ॥

संलापोत्थापकौ तद्वत् सङ्घात्यपरिवर्तके ।
संलापको गभीरोक्तिर्नानाभावरसा मिथः ॥ १० ॥
एकमुत्थापयेद् यत्र युद्धायोत्थापकः स हि ।
मन्त्रार्थदैवशक्त्याद्यैः सङ्घात्यस्सङ्घभेदनम् ॥ ११ ॥

प्रारब्धोद्योगकार्यान्यकरणं परिवर्तकः ।

कैशिकीवृत्त्यङ्गानि ।

मर्मस्फञ्जनर्मगर्भनर्मस्फोटाः सनर्मकाः ॥ १२ ॥

---

१. M निगद्यते.

THE KUPPUSWAMY SASTRI
RESEARCH INSTITUTE,
64, R.H. ROAD, MADRAS-4

कैशिक्याः शास्त्रसम्भूता सेयमङ्गचतुष्टयी ।
नर्मस्फञ्जः सुखारम्भो भयार्त्तो नवसङ्गमे ॥ १३ ॥

नर्मणा सुरतारम्भो नर्मगर्भ उदाहृतः ।
नर्मस्फोटो नृणामङ्गेष्वभिव्यक्ताङ्गजक्रिया ॥ १४ ॥

क्रीडाविदग्धभणितिर्नर्म सर्वोपहासकृत् ।
तदत्राष्टादशविधं प्रोक्तं तत्तत्त्ववेदिभिः ॥ १५ ॥

वचश्शुद्धं रूपशुद्धं क्रियाशुद्धं तथैव च ।
वाचानुरागकथनं वेषव्यक्तिकरं तथा ॥ १६ ॥

चेष्टाव्यक्तिकरं चैव वागिच्छाप्रतिपादनम् ।
रूपेच्छाकथनं चेष्टास्पष्टीकरणमेव च ॥ १७ ॥

वाग्भेदनं भेदरूपं क्रियाभेदनमेव च ।
वाग्भयं भयरूपं च चेष्टाभयकरं तथा ॥ १८ ॥

वाग्भीत्यपरसंयोगि वेषभीत्यपराश्रयि ।
चेष्टाभयान्यसंयोगीत्येवमष्टादशात्मकम् ॥ १९ ॥

केवलेनैव वचसा लोकहास्यकरं तु यत् ।
तदेव युक्तितोऽस्माभिर्वचश्शुद्धमुदाहृतम् ॥ २० ॥

केवलेनैव रूपेण जनताहासकारि यत् ।
तन्नर्म काव्यबन्धेषु रूपशुद्धं निगद्यते ॥ ॥ २१ ॥

नेत्रवक्त्रभ्रुवां चेष्टाविशेषैर्लोकहासकृत् ।
यत्तदस्माद्विधैः सर्वैः क्रियाशुद्धं निगद्यते ॥ २२ ॥

विदधाति गिरा यत्तु [1]सानुरागनिवेदनम् ।
वाचानुरागकथनं तदुक्तं भरतादिभिः ॥ २३ ॥

[2]नैपथ्यविधिना येन प्रणयावेशभाषणम् ।
करोति यत्तदेवात्र **वेषव्यक्तिकरं** स्मृतम् ॥ २४ ॥

[3]व्यापारेणैव यद् व्यक्तमभिलाषनिवेदनम् ।
कुरुते तदिह प्राच्याश्चेष्टाव्यक्तिकरं विदुः ॥ २५ ॥

सम्भोगेच्छां गिरा यत्तु वदति प्रियसन्निधौ ।
तदत्र कथ्यते सद्भिः वागिच्छाप्रतिपादनम् ॥ २६ ॥

रूपेण स्पष्टमाचष्टे सम्भोगेच्छां यदायताम् ।
रूपेच्छाकथनं तत्तु कथ्यते [4]तत्त्वकोविदैः ॥ २७ ॥

सम्भोगेच्छामतिप्रौढां चेष्टया प्रब्रवीति यत् ।
तदिह व्याहृतं चेष्टास्पष्टीकरणमञ्जसा ॥ २८ ॥

वचसा भेदनं भर्तुर्वाग्भेदनमुदाहृतम् ।
रूपेण भेदकरणं भेदरूपं निगद्यते ॥ २९ ॥

क्रिययोच्चाटनं भर्तुः क्रियाभेदनमुच्यते ।
वाचा भीतिकरं नर्म **वाग्भयं** [5]वैस्तुतो भवेत् ॥ ३० ॥

रूपेण भीतिजननं भीतिरूपमुदाहृतम् ।
चेष्टया विदधद्भीति चेष्टाभयकरं विदुः ॥ ३१ ॥

१. MT_1 स्वानुरागनिवेदनम्.
२. MT_1 नैपथ्यसंविधानेन.
३. $P'T_3$ व्यापारेण च.
४. T_3 सर्वकोविदैः.
५. PT_3 तु ततो भवेद्.

कथ्यते स इहास्माभिः सङ्ख्यानं वा क्रमोऽपि वा ।
अभिन्नस्योपमानेन प्रस्तुतस्य गुणद्युतिः ॥ १०९ ॥

विशेषं वक्तुमुदिता विशेष इति वर्ण्यते[2] ।
सादृश्यशब्दहीना चेदुपमा रूपकं भवेत् ॥ ११० ॥

एतद् विकल्पनीयं स्यात् कविभिः काव्यकोविदैः ।
सविशेषणमेकाङ्गमयुक्तं व्यतिरेकवत् ॥ १११ ॥

समस्तमसमस्तं च समस्तव्यस्तमित्यपि ।
यस्य यस्यामवस्थायां यादृशं वस्तुनो वपुः ॥ ११२ ॥

तत् तथैवार्पयत्युक्तिरग्राम्या जातिरुच्यते ।
जातिक्रियागुणद्रव्यैरेषा सा बहुधा मता ॥ ११३ ॥

वस्तुनोऽन्यप्रकारेण स्थितस्यापरथैव यत् ।
उत्प्रेक्षणं हि सोत्प्रेक्षा प्रायः सादृश्यगर्भिता ॥ ११४ ॥

अपकर्षमुपन्यस्य निन्दाभासः प्रदर्श्यते ।
अत्युत्तमां स्तुतिं कर्तुं यत्र तद् व्याजवर्णनम् ॥ ११५ ॥

प्रस्तुतं परिहृत्योच्चैरुपमानं निगद्यते ।
अप्रस्तुतस्तुतिः सेयमस्माभिरभिधीयते ॥ ११६ ॥

द्वयोर्यत्र गुणाधिक्याद् वर्तते वर्णनीयता ।
तत् साम्यमुच्यतेऽन्यत्र ख्यातेयं तुल्ययोगिता ॥ ११७ ॥

यस्मिन् पूर्वस्य पूर्वस्य भवेदुत्तरमुत्तरम् ।
विशेषणपदार्थस्य वस्तु सैकावलिः स्मृता ॥ ११८ ॥

---

१. T_2 has the following two lines after this:
उद्दिष्टानां पदार्थानामनुदेशो यथाक्रमम् ।
यथासङ्ख्यमिति प्रोक्तं सङ्ख्यानं क्रम इत्यपि ॥

२. T_3 omits the next three lines.

कार्यस्य निजमुत्सृज्य कारणं कारणान्तरम् ।
यंत्र स्वाभाविकं वापि विभाव्यं सा विभावना ॥ ११९ ॥

वर्णनीयसमुत्कर्षसिद्धये यो [1]विधीयते ।
आक्षेप उपमानस्य तमाक्षेपं प्रचक्षते ॥ १२० ॥

[2]वाच्ये प्रतीयमाने वा[3] सादृश्ये यत् पदार्थयोः ।
मुख्यस्याधिक्य[4]कथनं व्यतिरेकः स उच्यते ॥ १२१ ॥

[5]ऐकोभयगुणश्लेषहेतुभिः सोऽपि भेदभाक् ।
[6]सम्यक् सादृश्यकथनं भिन्नयोर्वस्तुनोर्द्वयोः ॥ १२२ ॥

श्लेष इत्युच्यतेऽस्माभिः स चानेकविधो भवेत् ।
कश्चित् प्रतिपदं भिन्नः कश्चिद् भिन्नः क्वचित् पदैः ॥ १२३

कश्चिदर्थैकसंयोगी कश्चिच्छब्दैकभेदकः ।
पूर्वोक्तसाध्यवाक्यार्थं यः साधयितुमुच्यते ॥ १२४ ॥

हेतुगर्भोऽन्यवाक्यार्थः स एवार्थान्तरं भवेत् ।
प्रकारेणापरेणैव यद्[7]वक्त्यर्थमतिप्रियम् ॥ १२५ ॥

शब्दार्थवृत्तिशून्येन [8]पर्यायोक्तं तदिष्यते ।
प्रस्तुतार्थस्य पुष्ट्यर्थं यत्काव्येषु [9]प्रदर्श्यते ॥ १२६ ॥

विरोधाभासवचनं स विरोध इति स्मृतः ।
संसर्गोऽलङ्कृतीनां यः समकक्ष्यतया कृतः ॥ १२७ ॥

१. P T_3 अभिधीयते.
२. M omits this and the next line.
३. T_2, सा.
४. P T_3 करणं.
५. T_3 omits this line.
६. P T_3 सद्यः for सम्यक् .
७. P T_3 वाक्यार्थमतिप्रियम् .
८. P T_3 उच्यते for इष्यते.
९. P T_3 प्रशस्यते.

अङ्गाङ्गित्वेन वद्धानां सङ्कीर्णं तन्निगद्यते ।
रसाभासादिनिर्माणकारणं यद् विभूषणम् ॥ १२८ ॥

तदत्र रसवद् वाचां रसवन्धविधानतः ।
सन्देहैर्नातिरिक्तं यल्लोकातीतं निगद्यते ॥ १२९ ॥

कविभिर्बुद्धिनैशित्यात् स एवातिशयो मतः ।
असंभाव्यार्थकथनमत्युक्तिरिति कथ्यते ॥ १३० ॥

वक्रोक्तिरुक्तवाक्यार्थस्वीकारोऽन्यादृशः स्मृतः ।
वस्त्वन्तरप्रसङ्गेन ध्वनिः स्याद् भाववर्णनम् ॥ १३१ ॥

भूष्यभूषणरूपंत्वं मिथः स्याद्यत्र वस्तुनोः ।
साहश्यमन्तरेणापि तदन्योन्यमिति स्मृतम् ॥ १३२ ॥

यादृशेनापि लिङ्गेन परोक्षं यदि गम्यते ।
वस्तु पुष्टार्थरसवदनुमानं तदुच्यते ॥ १३३ ॥

शब्दाभ्यासस्तु यमकं पादादिष्वपि कल्पितम् ।
नैवान्तस्तद्विकल्पानां तद् दृश्यं कविकर्मणि[1] ॥ १३४ ॥

विचित्रशब्दसन्दर्भश्चित्रमित्यभिधीयते ।
सोऽपि सन्दृश्यते मार्गश्चक्रबन्धादिषु स्थिरः ॥ १३५ ॥

अनौचित्यात् तदस्माभिरत्र लेशेन कथ्यते ।
चित्रमार्गप्रियैः सद्भिः काव्यसारे निरूप्यताम् ॥ १३६ ॥

सर्वसाहित्यविद्यासु परं प्रावीण्यमिच्छता ।
कविना काव्यसारो हि श्रोतव्यः प्रौढवेतसा ॥ १३७ ॥

तत्र प्रश्नोत्तरं त्रेधा कथ्यते कविपुङ्गवैः ।
अन्तर्लापिक्रमः कोऽपि बहिर्लापिक्रमोऽपरः ॥ १३८ ॥

---

१. P T_3 अस्माभिर्मार्ग उच्यते for तद् दृश्यं कविकर्मणि.

उभयात्मा भवेत् कोऽपि त्रिभङ्गी नाम शोभनः ।
यत्रोत्तरपदं वृत्तौ सोऽन्तर्लापी निगद्यते ॥ १३९ ॥

बहिरेवोत्तरं यत्र बहिर्लापी स उच्यते ।
एकमेवोत्तरपदं बाह्यं यत्र त्रिधा कृतम् ॥ १४० ॥

सुश्लिष्टं पतति श्लोके त्रिभङ्गी सा निगद्यते ।
अन्तर्लापिप्रभेदः स्यात् कोऽपि गुप्तोत्तराभिधः ॥ १४१ ॥

साक्षरच्युतकः कोऽपि दुर्भेद्यः कुशलैरपि ।
बहिर्लापिप्रभेदोऽपि लेशेनेह प्रदर्श्यते ॥ १४२ ॥

एकालापं द्विरभ्यासः साक्षरच्युतकं तथा ।
गतप्रत्यागतं मिश्रमिति पञ्चविधः स्मृतः ॥ १४३ ॥

प्रश्नगर्भितयैवोच्चैर्यत्र स्यादुत्तरं पदम् ।
तदेव कथ्यतेऽस्माभिर्गुप्तोत्तरमिति स्फुटम् ॥ १४४ ॥

काप्यक्षराणां लोपेन यत्रार्थः प्रतिपाद्यते ।
उत्तरोक्तप्रकारेण साक्षरच्युतकं हि तत् ॥ १४५ ॥

एकमेव पदं द्व्यर्थं यत्र स्यादुत्तरं द्विधा ।
प्रश्नद्वयवति श्लोके तदेकालापमुच्यते ॥ १४६ ॥

एकमेवोत्तरं यत्र लिङ्गेन वचनेन वा[3] ।
प्रयाति भेदाद्वितयं द्विरभ्यासः स उच्यते ॥ १४७ ॥

---

१. P यस्य for यत्र

२. M प्रश्नगर्भतयैवोच्चैः, P प्रश्नगर्भत एवोच्चैः, T_3. प्रश्नगर्भितमेवोच्चैः.

३. T_3 च.

यत्र स्याल्लिपिलोपेन समीचीनोऽर्थविस्तरः ।
न भवत्यन्यथावृत्तेः[1] तत् स्यादक्षरलोपकम् ॥ १४८ ॥

प्रतिलोमानुलोमेन यत्र स्यादुत्तरं द्विधा ।
गतप्रत्यागतमिति तदेव कवयो विदुः ॥ १४९ ॥

संस्कृतप्राकृतोल्लासि मिश्रमित्यभिधीयते ।
वलयारान्तरालेषु रथाङ्गस्य तथोदरे ॥ १५० ॥

नियमेनाक्षरन्यासश्चक्रबन्धोऽभिधीयते[2] ।
तस्य भेदो महानेव नास्माभिरिह कथ्यते ॥ १५१ ॥

प्रसिद्धत्वात् परं त्राच्यमष्टारं षडरं तथा ।
चतुर्णामेव सुव्यक्तमराणामन्तरर्पितैः ॥ १५२ ॥

यत्रान्योन्यनिबद्धानां गतप्रत्यागताक्षरैः ।
आरम्भश्च समाप्तिश्च पादानां नाभिमण्डले ॥ १५३ ॥

अराणां व्यक्तमन्येषामग्रेष्वेकैकमक्षरम् ।
अराणामन्तरालेषु बहिर्वलयवर्तिषु ॥ १५४ ॥

एकैकाक्षरसंयुक्तं छन्दसानुष्टुभा[3] कृतम् ।
तदष्टारमिति[4] ज्ञेयं विद्वद्भिश्चक्रबन्धनम् ॥ १५५ ॥

वलयत्रितयच्छिद्रेष्वेकद्विस्त्र्यक्षरान्वितम् ।
एकं नाभ्यन्तरं यत्र कविकाव्याभिधाङ्कितम् ॥ १५६ ॥

१. M अन्यथार्थत्वे for अन्यथा वृत्तेः.
२. M निगद्यते for अभिधीयते.
३. M T3 त्रिष्टुभा for अनुष्टुभा ।
४. T3 omits ten lines from this.

चतुर्थपादसंसक्तैराद्यन्तैरक्षरैः श्रितम् ।
अरषट्कस्य रेखासु पादत्रितयमर्प्यते ॥ १५७ ॥

षडराभ्रान्तरालेषु द्वाभ्यां प्रत्येकभागतः ।
अक्षराभ्यामतिस्पष्टकल्पिताभ्यां प्रपूरितम् ॥ १६८ ॥

यदक्षरं तृतीयान्ते[1] तदत्यन्तातिशोभिनः ।
पादश्चतुर्थो दृश्येत बहिर्वलयमण्डले ॥ १५९ ॥

तदत्र षडरं नाम कथ्यते चक्रबन्धनम् ।
एकमेवाक्षरं यत्र कर्णिकामध्यसंस्थितम् ॥ १६० ॥

वृत्तार्धत्वं प्रयात्यर्धं दलस्थान्यक्षराणि च ।
अन्योन्यसङ्कराच्छ्लोकः पद्मबन्धः स उच्यते ।
एवमेवावगन्तव्यो विद्वद्भिश्चित्रविस्तरः ॥ १६१ ॥

सत्काव्यलक्षणमशेषगुणाभिरामं
निःशेषदूषणविशेषविचारयुक्तम् ।
एतद् व्यधायि बुधमण्डलमण्डनेन
सर्वेश्वरेण मुनिना कविपुङ्गवेन ॥ २६२ ॥

इति[3] श्रीमन्मलयजमहापण्डितसर्वेश्वराचार्यविरचिते
साहित्यसारे द्वितीयः प्रकाशः ।

१. M शोभितः.
२. P T_3 इति साहित्यसारे द्वितीयः प्रकाशः.

तृतीयः प्रकाशः ।

लक्षणानि ।

भूषणमक्षरसङ्घः शोभा गुणकीर्तनं निरुक्तं च ।
अभिमानोदाहरणे गुणानुवादः प्रियं हेतुः ॥ १ ॥

प्रोत्साहनसारूप्ये मिथ्याव्यवसायसिद्धिदृष्टान्ताः ।
आशीस्संशयकपटौ क्षमानुवृत्ती पदोच्चयाक्रन्दौ ॥ २ ॥

परिदेवनोपपत्ती याच्ञा प्राप्तिर्मनोरथो युक्तिः ।
अतिशयपृच्छाख्यानप्रतिषेधाः सानुनीतिनिर्भासाः ॥ ॥ ३ ॥

कार्यं पश्चात्तापः षट्त्रिंशल्लक्षणावलिः सेयम् ।
[1]नाट्ये भावार्थगताः सालङ्कारा बुधैः प्रयोक्तव्याः ॥ ४ ॥

अलङ्कृतिरलङ्कारैरभिधेयस्य भूषणम् ।
अल्पाक्षरैरनल्पार्थविवृतिस्त्वक्षरावलिः ॥ ५ ॥

सिद्धैरर्थैः समीकृत्य **शोभा** सिद्धस्य भाषणम् ।
बहुनामभिरेकस्य वर्णनं **गुणकीर्तनम्** ॥ ६ ॥

निरुक्तं विविधं तथ्यमतथ्यमिति कथ्यते ।
सिद्धया प्रसाधितं तथ्यमतथ्यमितरद् भवेद् ॥ ७ ॥

अनिर्णयोऽभिमानः स्यादभिधेयस्य हेतुभिः ।
उदाहृतिर्गभीरोक्तिः प्रसिद्ध्याक्षेपगर्भिता ॥ ८ ॥

गुणानुवादो महता गुणेनाल्पस्य तुल्यता ।
आदौ यत् क्रोधजननं तत् **प्रियं** प्रीतिकृत् पुनः ॥ ९ ॥

अनादृत्य बहूनर्थान् हेतुरिष्टार्थसाधनम् ।
प्रीत्युत्साहकरैरर्थैरुक्तिः **प्रोत्साहनं** भवेत् ॥ १० ॥

१. P T1. 3 काव्ये.
२. M T1. 2 शासनं.

अपदेश्यः परोक्षोऽपि **सारूप्यं** जायते यतः
अभूतपूर्वैर्यत्रार्थैरसदर्थः प्रसाध्यते ॥ ११ ॥

स **मिथ्याव्यवसायः** स्याद् वक्तृव्यापारनिश्चयात् ।
सिद्धिः स्यादप्रसिद्धस्य सुप्रसिद्धेषु कीर्तनम् ॥ १२ ॥

सहादिसदृशार्थेन **दृष्टान्तो**ऽर्थस्य शंसनम् ।
आशीराशंसनं वस्तुन्यभीष्टे मृदुभिः पदैः ॥ १३ ॥

अपरिज्ञाततत्त्वार्थं वचः **संशय** उच्यते ।
छलोक्त्या कथितार्थस्य **कपटो**ऽन्यादृशग्रहः ॥ १४ ॥

दुर्जनोक्तिषु तीव्रासु **क्षमा** स्यादविकारता ।
प्रश्रयेणान्यथार्थोक्तिरनुद्वृत्तिरिति स्मृता ॥ १५ ॥

गुणैरनेकैरेकार्थैरुचितैरुत्तरोत्तरम् ।
पदोच्चयो वस्तुनः स्यादुज्झितात्मकवर्णनम् ॥ १६ ॥

[3]तीव्रः साक्षादवाच्योऽर्थो यत्राभिप्रायगोचरः ।
आख्यायतेऽन्यथा[3]न्यस्य स **एवाक्रन्द** उच्यते ॥ १७ ॥

अन्यथान्यकृतैर्दोषैः **परिदेवनमन्यतः** ।
प्रसिद्धदोषगुणतामुपपत्तिं विदुर्बुधाः ॥ १८ ॥

आदौ क्रोधकृदायत्यां सफलं वस्तु **याचनम्** ।
दृष्ट्वावयवमर्थस्य कल्पना **प्राप्तिरुच्यते** ॥ १९ ॥

मनोरथो [4]यथाभूतं स्वाभिप्रायस्य शंसनम् ।
साध्यतोऽर्थस्य सम्बन्धो **युक्तिर्वस्तुभिरिष्यते** ॥ २० ॥

---

१. Three lines from this are lost in P.
२. P T_3 तीक्ष्णः.
३. P T_2 अन्यत्र for अन्यस्य.
४. M $T_{1.2}$ भूतपूर्वं for यथाभूतं

द्वितीयः प्रकाशः ।

वचस्संवृत्तया भीत्या रसान्तरविचारि यत् ।
वाग्भीत्यपरसंयोगि भवेत् तन्नर्म नाटके ॥ ३२ ॥

वेषावलोकनोत्पन्नभीत्या यच्च रसान्तरम् ।
याति नर्म तदेवात्र वेषभीत्यपराश्रयि ॥ ३३ ॥

व्यापारघातभीत्यैव यद् गच्छति रसान्तरम् ।
चेष्टाभयान्यसंयोगि तदाहुर्नाट्यकोविदाः ॥ ३४ ॥

आरभटीवृत्त्यङ्गानि ।

संक्षिप्तिका च सम्फेटो [1]वस्तुस्थापनपौतने ।
इयमारभटीवृत्तेः कथ्यतेऽङ्गचतुष्टयी ॥ ३५ ॥

वस्तुभिः कल्पनायोगस्तत्र संक्षिप्तिका भवेत् ।
सम्फेटस्तु समाघातः क्रोधसंरब्धयोर्द्वयोः ॥ ३६ ॥

मायासंस्थापिवं वस्तु [3]वस्तुस्थापनमिष्यते ।
[4]पौतनन्त्वत्र निष्क्रामप्रवेशत्रासविद्रवाः ॥ ३७ ॥

[5]काव्यदोषाः ।

पदे वाक्ये च वाक्यार्थे दोषाः स्युः काव्यसंश्रयाः ।
तत्र पूर्वं पदगताः कथ्यन्ते सह लक्षणैः ॥ ३८ ॥

सम्बन्धहीनं दुर्बोधमप्रसिद्धमनर्थकम् ।
गूढार्थं रूढिरहितमप्रतीतमवाचकम् ॥ ३९ ॥

विलष्टं म्लानमपुष्टार्थमसाधु समयच्युतम् ।
अक्षमार्थान्तरं कष्टमप्रयुक्तं ससंशयम् ॥ ४० ॥

१. M PT$_3$ वस्तूत्थापनपातने.
२. M यापने.
३. M वस्तूत्थापनमिष्यते.
४. M यापनन्त्वत्र.

विरुद्धार्थान्तरं अष्टमपार्थं ग्राम्यमस्तुतम् ।
पर्यायज्ञापकं देश्यमसम्भाव्यार्थसाधकम् ॥ ४१ ॥

इत्येवं पदसम्बन्धा दोषाः स्युः पञ्चविंशतिः ।
सम्बन्धे रूढमन्यस्य पदमन्यस्य यत् कृतम् ॥ ४२ ॥

सम्बन्धहीनमस्माभिः तदेव हि निगद्यते ।
श्रवणव्यतिरेकेण यस्यार्थो न प्रतीयते ॥ ४३ ॥

काव्यतत्त्वविशेषज्ञैर्दुर्बोधं तदुदाहृतम् ।
शब्दशास्त्राविरोधित्वान्मोहाद्वा क्वापि यत्पदम् ॥ ४४ ॥

येन केनापि कथितमप्रसिद्धं तदुच्यते ।
यदसत्कविना काव्ये पादपूरणमिच्छता ॥ ४५ ॥

क्रियतेऽर्थेन रहितं तत्पदं स्यादनर्थकम् ।
नितरामप्रसिद्धेऽर्थे बह्वर्थं यत्पदं कृतम् ॥ ४६ ॥

तदत्र काव्यतत्त्वज्ञाः गूढार्थं कवयो विदुः ।
सम्यगाच्छादितेष्वर्थेष्वसिद्ध्या निरूपितम् ॥ ४७ ॥

कथ्यते रूढिरहितं पदमस्माद्विधैरिह ।
शास्त्रमात्रप्रसिद्धयैव प्रबन्धे यन्निरूप्यते ॥ ४८ ॥

तदाहुरप्रतीताख्यपदं पदविचारकाः ।
अर्थान्तरे सुप्रसिद्धे यदन्यत्रापि साध्यते ॥ ४९ ॥

व्युत्पत्तिभ्रान्तिसंयोगात्तद्वाचकमुच्यते ।
स्वबुद्ध्या कल्पितार्थं यत् तत्पदं क्लिष्टमुच्यते ॥ ५० ॥

१. M उदाहृतम्.
२. P T_3 यदि सत्कविना.
३. P T_3 सुतरां.
४. P T_3 असिद्धया हि for अप्रसिद्धया.
५. M T_3 अप्रतीताख्यं पदं.

विचारपारुष्यवशात् सुसौभाग्यविवर्जितम् ।
यत्पदं तत्तु विद्वद्भिर्म्लानमित्यभिधीयते ॥ ५१ ॥

यत्र सन्दृश्यतेऽत्यर्थं पदे तुच्छाभिधेयता ।
तदपुष्टार्थमित्याहुः सर्वे साहित्यवेदिनः ॥ ५२ ॥

शब्दशास्त्रविरुद्धं यत् प्रबन्धे प्रतिपाद्यते ।
शब्दतत्त्वविशेषज्ञैस्तदसाधु निगद्यते ॥ ५३ ॥

यदुक्तमन्यथा काव्ये कवीनां समयोऽन्यथा ।
तदेव सम्यगस्माभिः समयच्युतमुच्यते ॥ ५४ ॥

यस्यासमर्थतात्यर्थमिष्टस्यार्थस्य सूचने ।
अक्षमार्थान्तरं तत्तु कथ्यते कविपुङ्गवैः ॥ ५५ ॥

दुरुच्चारतया काव्ये यदश्राव्याक्षर पदम् ।
तदत्र सुकविव्रातैः कष्टमित्यभिधीयते ॥ ५६ ॥

लेशेनापि प्रबन्धेषु सुप्रसिद्धं न यत् पदम् ।
तदप्रयुक्तमित्याहुः सर्वे साहित्यकोविदाः ॥ ५७ ॥

वक्तव्यार्थमतिक्रम्य यदन्यत्रापि वर्तते ।
तदत्र लक्षणेऽस्माभिः ससंशयमुदाहृतम् ॥ ५८ ॥

अर्थान्तरं विरुद्धं स्याद्यत्र प्रस्तुतवस्तुनः ।
विरुद्धार्थान्तरं प्रोक्तं तदत्र निपुणाशयैः ॥ ५९ ॥

वाञ्छितार्थात्परिभ्रष्टं पदं भ्रष्टमिहोच्यते ।
अन्यार्थमर्थहीनं च तद् द्विधा परिकीर्त्यते ॥ ६० ॥

१. P T_3 यस्य·
२. P T_3 अश्राव्यशब्दशास्त्रं यत्प्रबन्धे.
३. T_1 च For यत ·
४. M वेदिनः.
५. PT_3 omit the next 17 lines

तदपार्थमिति ज्ञेयं यदप्रस्तुतजीवकम् ।
सद्यः सभ्येतरार्थस्य स्मारकं ग्राम्यमुच्यते ॥ ६१ ॥

अस्तुतं तदबुधैरुक्तं यदमङ्गलवाचकम् ।
प्रसिद्धस्याभिधानस्य पर्यायैः स्वेच्छया कृतम् ॥ ६२ ॥

एकार्थैर्वाथ भिन्नार्थैः पर्यायज्ञापकं भवेत् ।
यस्य व्युत्पत्तिलेशोऽपि चिन्त्यमाने न दृश्यते ॥ ६३ ॥

तदत्र पदतत्त्वज्ञैर्देश्यमित्यभिधीयते ।
असम्भाव्यो यदर्थस्य सञ्चयः कलही मिथः ॥ ६४ ॥

तदुच्यतेऽत्र विद्वद्भिरसम्भाव्यार्थसाधकम्
एवमेते मया प्रोक्ता दोषाः पदसमाश्रयाः ॥ ६५ ॥

वाक्याश्रया निगद्यन्ते सुव्यक्तं लक्षणैस्सह ।
शब्दच्युतं क्रमापेतमश्राव्यं पुनरुक्तिमत् ॥ ६६ ॥

छन्दोभङ्गाकुलं ग्राम्यं व्याकीर्णं भग्नरीतिकम् ।
यतिभङ्गाश्रयं न्यूनमधिकं वाक्यगर्भितम् ॥ ६७ ॥

विरुद्धसन्धिनिस्सन्धी तुच्छार्थकमवाचकम् ।
इति वाक्यगता दोषाष्षोडशेह निरूपिताः ॥ ६८ ॥

यत्सङ्गत्या स्फुटं याति सुशब्दोऽप्यपशब्दताम् ।
तद्वाक्यमत्र साहित्ये शब्दच्युतमिति स्मृतम् ॥ ६९ ॥

पदार्थक्रमनिर्मुक्तं क्रमापेतमिति स्मृतम् ।
बन्धकार्कश्यवद्वाक्यमश्राव्यं कवयो विदुः ॥ ७० ॥

शब्दार्थयोः परावृत्त्या द्युक्तयोः पुनरुक्तिमत् ।
छन्दसा विकलं वाक्यं छन्दोभङ्गाकुलं भवेत् ॥ ७१ ॥

उक्तिश्चातुर्यरहिता ग्राम्यमित्यभिधीयते ।
असङ्गताभिराकीर्णं व्याकीर्णं स्याद्विभक्तिभिः ॥ ७२ ॥

प्रारब्धरीतिविच्छेदो यत्र तद्भग्नरीतिकम् ।
यतिभङ्गेन संयुक्तं यतिभङ्गाश्रयं विदुः ॥ ७३ ॥

यस्यापरिसमाप्तिः स्यात् तन्न्यूनमिति कथ्यते ।
अपर्याप्ततया ह्यर्थो यत्रैकः पर्यवस्यति ॥ ७४ ॥

पदानामिह तद्वाक्यमधिकं कथ्यते बुधैः ।
अत्यर्थसङ्गतार्थत्वाद्वाक्यं वाक्यान्तरस्थितम् ॥ ७५ ॥

दुःखेन ज्ञापनीयार्थं वाक्यगर्भितमुच्यते ।
विरुद्धसन्धिर्ग्राम्यादिः प्रस्तुतार्थस्य घातकः ॥ ७६ ॥

[1]निन्द्यरूपोऽथवा नष्टो निस्सन्धिरभिधीयते ।
तुच्छार्थकमिहाख्यातमौदार्यस्य विपर्ययः ॥ ७७ ॥

नार्थं विवक्षितं वक्ति यत्तदाहुरवाचकम् ।
एते वाक्यगता दोषा वाक्यार्थस्थान् वदाम्यहम् ॥ ७८ ॥

औचित्यभङ्गः सन्देहो रीतिभङ्गः क्रमच्युतिः ।
उपक्रमोपसंहारविषमं दुष्टभूषणम् ॥ ७९ ॥

दुष्प्रतीतिकरं चेति सप्त वाक्यार्थसंश्रयाः ।
औचित्यभङ्गो विज्ञेयः स्वात्मप्रख्यापनादिकम् ॥ ८० ॥

सन्देहः पदजातस्य सन्दिग्धार्थत्वमुच्यते ।
प्रारब्धस्यान्यथाभावो रीतिभङ्ग उदाहृतः ॥ ८१ ॥

---

१. $T_{1.2}$ M omit this line.

अपक्रमाभिधेयत्वं क्रमच्युतिरिति स्मृता ।
उपक्रमोपसंहारविषमं वाच्यवक्रता ॥ ८२ ॥

भिन्नलिङ्गोपमारीतिर्दुष्टभूषणमुच्यते[1] ।
सभ्येतरस्य स्पष्टोक्तिर्ग्राम्यमित्यभिधीयते ॥ ८३ ॥

एतैर्दोषैरसंस्पृष्टं काव्यं सर्वैः प्रशस्यते ।

काव्यगुणाः ।

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ॥ ८४ ॥

अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ।
एते दशगुणाः प्रोक्ताः काव्यबन्धे कवीश्वरैः ॥ ८५ ॥

सुश्लिष्टपदसन्धानं श्लिष्टमित्यभिधीयते ।
यस्यार्थः स प्रसादः स्यादनुक्तोऽपि प्रतीयते ॥ ८६ ॥

शब्दार्थौ समतान्योन्यं सालङ्कारौ सुसंस्कृतौ ।
अप्युक्तं बहुशश्चेतःप्रीतिकृन्मधुरं मतम् ॥ ८७ ॥

पदैर्मृदुभिराकीर्णं सुकुमारमिहोदितम्[3] ।
अर्थव्यक्तिः पदोद्देशात् समस्तार्थावबोधिनी ॥ ८८ ॥

तदुदारत्वमासाद्य यन्मनो नावसर्पति ।
ओजः समासबहुलः सन्दर्भः सुमनोहरः ॥ ८९ ॥

चारणता कान्तिः सन्धिसन्धानसम्पदा ।
समाधिरन्यथाशब्दकल्पनीयार्थसञ्चयः ॥ ९० ॥

१. P T3 add भिन्नलिङ्गोपमाः भिन्नवचनोपमाः अधिकोपमाः अतीत-गुणोपमाः इत्येवमाद्या दुष्टालङ्करणम् ।

२. P सुसंयुतौ.

३. P T3 सुकुमारं मनोरमैः.

अलङ्काराः।

अतः परमलङ्काराः [1]वक्ष्यन्ते सह लक्षणैः।
तत्र शब्दार्थसम्बन्धा[2]नुभयोल्लासितानपि ॥ ९१ ॥

सम्यगेकत्र संक्षिप्य लिखामि मधुराक्षरम्।
अपन्हुतिः समासो[3]क्तिरुपमा दीपकं क्रमः ॥ ९२ ॥

विशेषो रूपकं जातिरुत्प्रेक्षा व्याजवर्णनम्।
अप्रस्तुतस्तुतिः साम्यमेकावलिवि[4]भावने ॥ ९३ ॥

आक्षेपव्यतिरेकौ च श्लेषोऽर्थान्तरमेव च।
पर्यायोक्तं विरोधश्च सङ्कीर्णं रसवत् तदा ॥ ९४ ॥

अतिशयोक्तिरत्युक्तिर्वक्रोक्तिर्ध्वनिरेव च।
अन्योन्यमनुमानं च सचित्रयमकं तथा ॥ ९५ ॥

एते त्रिंशदलङ्कारा निर्दिष्टा रसकोविदैः।
व्यावर्णनीयं प्रच्छाद्य यत्रान्यत् किञ्चिदुच्यते ॥ ९६ ॥

असमं वा समं वाथ सा विज्ञेया ह्यपह्नुतिः।
बहुधा सा भवेद् व्याप्ता स्वरूपविजयादिषु ॥ ९७ ॥

वस्तु किञ्चिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः।
उक्तिः संक्षिप्तरूपत्वात् सा समासो[5]क्तिरिष्यते ॥ ९८ ॥

[6]विशेष्यमात्र[5]भिन्नापि तुल्याकार[6]विशेषणा।
अस्त्यसावपराप्यस्ति भिन्नाभिन्नविशेषणा ॥ ९९ ॥

---

१. M_1 वक्ष्यन्ते.
२. P T_3 अनुभवोल्लासि.
३. P T_3 उच्यते for इष्यते.
४. P T_3 omit this and the next line.
५. $T_{1\,2}$ भिन्नाभिः for भिन्नापि.
६. $T_{1\,2}$ विशेषणैः for विशेषणा.

सौधर्म्यमुपमा प्रौढगुणवद्गुणवस्तुनोः ॥ ।
द्विविधा सापि कथिता सर्वसाहित्यकोविदैः ॥ १०० ॥

पदार्थविषया काचिद्वाक्यार्थविषयापरा ।
तत्रापि प्रथमा द्वेधा पूर्णा लुप्ता च कथ्यते ॥ १०१ ॥

धर्मोपमानोपमेयैः पूर्णता प्रतिपाद्यते ।
गुणादिलोपे लुप्ता स्यादुपमानपदे सति ॥ १०२ ॥

भवेद्वाक्यार्थयोर्या स्यादुपमानोपमेययोः ।
एकवाक्यार्थताप्राप्तिः सा वाक्यार्थोपमा स्मृता ॥ १०३ ॥

एकस्या बहवो भेदाः दृश्यास्सत्कविवर्त्मनि ।
मुख्यार्थवस्तुना युक्तैस्तद्वाक्यैस्सह सङ्गतिम् ॥ १०४ ॥

सन्दधद्द्योतयत्यर्थान्[२] तत् पदं दीपकं स्मृतम्[३] ।
पदान्तर्गतवाक्यैर्वा कारकैरन्वितं यदि ॥ १०५ ॥

पदमेकं क्रियावाचि तत्क्रियादीपकं भवेत् ।
यद्भूरिवाक्यसम्बन्धक्रियाणामेकमेव चेत् ॥ १०६ ॥

उच्यते कारकपदं तत् स्यात् कारकदीपकम् ।
यत्र दीपकसूत्रेण वाक्यपुष्पाणि सत्कविः ॥ १०७ ॥

ग्रथ्नात्यपूर्वविच्छित्त्या तन्मालादीपकं विदुः ।
उपमानोपमेयानां यः सम्बन्धः क्रमोदितः ॥ १०८ ॥

१. For Ślokas 100 b to 104 a M $T_{1.\ 2}$ read :
यथा कथञ्चित्सादृश्यं यत्रोद्भूतं प्रतीयते ।
उपमा नाम सा तस्याः प्रपञ्चः सुमहान् भवेत् ॥
धर्मवस्तुविपर्यासनियमातिशयाश्रयाः ।
मोहोत्प्रेक्षानियमा दृश्यास्सत्कविवर्त्मसु ॥ (?)

२. M बोधयत्यर्थान्.

३. T_2 भवेत्.

अत्युत्तमार्थादधिको योऽर्थः सोऽतिशयः स्मृतः ।
यत्राकारगभीरोक्त्या पृच्छा पृष्टार्थकीर्तनम् ॥ २१ ॥

पृष्टैरपृष्टैर्वाख्यानं कश्चिदर्थस्य निर्णयः ।
अर्थेनाभिमते रम्या प्रतिषेधो हि विक्रिया ॥ २२ ॥

अनुनीतिरपूर्वस्य क्रोधस्योद्दीपनक्रिया ।
अनेकयुक्तिमद्वाक्यं तन्निर्भासनमुच्यते ॥ २३ ॥

दोषानुत्सार्य कार्यं स्याद् गुणेऽर्थस्य निवेशनम् ।
अकार्यं सहसा कृत्वा पश्चात्तापोऽनवस्थितिः ॥ २४ ॥

नाट्यव्यवहारोपयोगिपरिभाषाः ।

आक्रीडं देहली हञ्जे हळा हीमाणहे (ति च ? सखी)
ओपट्टिकं वरण्डी ही पुरोभागजनान्तिके ॥ २५ ॥

आकाशहन्तस्वगतप्रकाशस्वामिभावकाः ।
ऊराजन्भावभगवन्नज्जभट्टिगेगणिकाः ॥ २६ ॥

ईशर्मन्नम्महेरण्डबाढमाभर्तृदारिकाः ।
स्वामिन्यात्मगतं कान्ते प्रिये हे मञ्जुभाषिणि ॥ २७ ॥

आर्य देव विभो वत्स सारथे राजदारिके ।
हण्डः कुलपतिर्वङ्कुसौदामिन्यामनामतः ॥ २८ ॥

आवुत्तो भगवत्यत्ता गुरुर्जाद हमज्जुका ।
आयुष्मन् प्रथमः कल्पः विजया सार्थवाहकः ॥ २९ ॥

चम्पकाशोकपुन्नागमालतीयूथिकावृतम् ।
आहुरुद्यानमाक्रीडं नामतो नाट्यकोविदाः ॥ ३० ॥

---

१. Eighteen lines from this are lost in T_8.

गृहालिन्दकभागस्तु देहलीति निगद्यते ।
नाटके नाट्यतत्त्वज्ञैर्वक्तव्या साधु सा क्वचित् ॥ ३१ ॥

जियमेनैव वक्तव्या हज्जेति परिचारिका ।
गणिकाभिरथान्याभिः समया सा निगद्यते ॥ ३२ ॥

हळेति कथ्यते चेटी नाटके नायिकाजनैः ।
गणिकाभिरपि क्वापि विनोदे राजदारिका ॥ ३३ ॥

शकाराभीरचण्डालश्वपाकवृषलादिभिः ।
हीमाणह इति स्पष्टं वक्तव्यं सदृशे जने ॥ ३४ ॥

समानरूपसम्पत्तिशीलादिगुणशालिनी ।
सखीति कथ्यते नारी नारीभिर्नाटकाश्रिता ॥ ३५ ॥

विद्यमानेषु मनसि कार्यजातेष्वनेकधा ।
तदोपट्ठिकमित्याहुः प्रधानं यन्मनीषिणाम् ॥ ३६ ॥

आकाशे वातसंयोगात्सञ्जातो यो वरण्डकः ।
स एवान्येन शब्देन वरण्डीत्यभिधीयते ॥ ३७ ॥

भयाहङ्कारसम्मानमोहकण्ठग्रहादिषु ।
हीशब्दोऽपि प्रयोक्तव्यश्चटचेटीविदूषकैः ॥ ३८ ॥

पश्चात्तापप्रवासोर्वीचलनप्राणहानिषु ।
नायिकाहृदयोत्कम्पः पुरोभाग इति स्मृतः ॥ ३९ ॥

त्रिपताकं करं कृत्वा यदन्यस्य मनोगतम् ।
अप्रकाशं जनो वक्ति तज्जनान्तिकमुच्यते ॥ ४० ॥

अप्रत्यक्षेण पात्रेण सह रङ्गस्थितो नरः ।
यद्ब्रवक्त्यभिमुखीकृत्य तदाकाशं प्रचक्षते ॥ ४१ ॥

१. T_1 उदाहृतं, MT_2 इति स्मृतं for प्रचक्षते ।

पुरोहितद्विजामात्यविटनेतृतपस्विभिः ।
विषादभयचिन्तासु हन्त ! इत्यभिधीयते ॥ ४२ ॥

समीपावस्थितेष्वन्येष्वनेकेष्वाप्तबुद्धिषु ।
मनसा यन्नरो वक्ति स्वगतं तन्निगद्यते ॥ ४३ ॥

मनस्यवस्थितं कार्यं पुरतः पार्श्ववर्तिनाम् ।
निरशङ्कमुन्यते यत्तु तत्प्रकाशं विदुर्बुधाः ॥ ४४ ॥

चमूपरिवृढामात्यजनतामण्डलेश्वरैः ।
स्वामीति विजयोल्लासी चक्रवर्ती निगद्यते ॥ ४५ ॥

समस्तख्यातसाहित्यसारनिष्णातमानसः ।
विचारचतुरः प्राज्ञो रसिको भावकः स्मृतः ॥ ४६ ॥

विरहोन्मादमूर्च्छायामीर्ष्यायां वाङ्मनाजनैः ।
ऊ इत्येवानभिव्यक्तं वक्तव्यं नाटकादिषु ॥ ४७ ॥

उदात्तजातिविख्यातदेवब्राह्मणलिङ्गिभिः ।
नृपतिर्नाटकगतो राजन्नित्येव कथ्यते ॥ ४८ ॥

नटेन नाटके सूत्री भाव इत्यभिधीयते ।
सर्वाश्रमगतो वर्णी वा वर्णिव्यञ्जनो जनः ॥ ४९ ॥

रङ्गे रङ्गगतैः पात्रैर्भगवन्निति कथ्यते ।
नाट्ये विदूषकप्रायो (यो जनः) स व ः ॥ ५० ॥

अज्ज इत्येव वक्तव्यो हीनोऽपि ब्राह्मणो यदि ।
नेतुर्या ख्यातमहिषी रूपसम्पद्गुणादिभिः ॥ ५१ ॥

भृत्यवनितावर्गैः वक्तव्या भट्टिणीति सा ।
स या वेश्या क ··· वेशे (?) स्वयं च गणिकायते ॥ ५२ ॥

सा नाट्ये नाट्यवेदज्ञैः गण्डिकेति निगद्यते ।
पीठमर्दशठक्रूरधूर्तचेटीविटादिभिः ॥ ५३ ॥

निन्दायामथवा गर्वे ईशब्दः सम्प्रयुज्यते ।
विद्याविनयसम्पन्नो द्विजन्मा नाट्यकोविदैः ॥ ५४ ॥

नाम्ना सहैव सम्बुद्धौ हे शर्मन्निति कथ्यते ।
यदृच्छाधिगमे प्रायो दुर्लभस्येह वस्तुनः ॥ ५५ ॥

नायिका वक्ति सन्तोषान्नित्यमम्मह इत्यलम् ।
या रण्डा वर्णिपाषण्डैश्चण्डालैर्वा विनाशिता ॥ ५६ ॥

नाटके नाट्यशास्त्रज्ञैः सा रण्डेत्यभिधीयते ।
येन केनापि मान्येन प्रार्थ्यमानस्य वस्तुनः ॥ ५७ ॥

अङ्गीकारेषु वक्तव्यं बाढमित्येव नायकैः ।
बहुधा चिन्त्यमानस्य दुर्विज्ञेयस्य वस्तुनः ॥ ५८ ॥

सहसा ज्ञानसम्पत्तावा इत्यास्तैर्निगद्यते ।
या राजपुत्री विख्याता निश्शेषजनवन्दिता ॥ ५९ ॥

राजश्रिया समायुक्ता सा कन्या भर्तृदारिका ।
सिंहासनाधिरूढा या पट्टोल्लासिलललाटिका ॥ ६० ॥

सा राजपुरुषैर्मुख्यैः स्वामिनीति निगद्यते ।
मनसा चिन्तयित्वार्थं हस्तविन्यस्तमस्तकः ॥ ६१ ॥

भूयशो यद्वदेदन्तस्तदात्मगतमुच्यते ।
कान्तेति नायको ब्रूते दक्षिणः पूर्ववल्लभाम् ॥ ६२ ॥

शठः स्वस्यानभिप्रेतां प्रियेनि वदति स्त्रियम् ।
नाटकादिषु सर्वत्र विटः सर्वाङ्गनाः मति ॥ ६३ ॥

मञ्जुभाषिणीत्येव वदत्यधिकबुद्धिमान् ।
वणिक्पुरोहितामात्यविटविप्रविदूषकाः ॥ ६४ ॥

कथ्यन्ते मध्यमैः पात्रैरार्यशब्देन सर्वदा ।
स्वप्रधानादिभिर्भूपो देव इत्यभिधीयते ॥ ६५ ॥

विभुशब्देन वक्तव्या देशाधिपतयो द्विजाः ।
ज्येष्ठोपाध्यायपितृभिरन्यैरपि च तत्समैः ॥ ६६ ॥

वत्स इत्येव वक्तव्यास्त्रैवर्णिककुमारकाः ।
रथी सारथिशब्देन स्वसूतं वक्ति नाटके ॥ ६७ ॥

सूत इत्येव वा क्वापि नान्यथा कथनक्रमः ।
राजकीयैर्जनैः सर्वा महीपप्रियनन्दनाः ॥ ६८ ॥

दारिकेत्येव वक्तव्या राजपूर्वाः कुलाधिकाः ।
सर्वत्र हीनसम्बुद्धौ हण्ड इत्यभिधीयते ॥ ६९ ॥

सर्वविद्यासु कुशलः सर्वाश्रमपदेश्वरः ।
मुनिः कुलपतिः सर्वैर्वक्तव्यो नाटकाश्रितः ॥ ७० ॥

वड्ढेति विनयाभावे नीचपात्रैः प्रयुज्यते ।
विद्याधरी स्वकान्तेन सौदामिन्यभिधीयते ॥ ७१ ॥

सावज्ञमङ्गीकरणे तज्ज्ञैरामेति कथ्यते ।
आह्वानं कुर्वतेऽन्योन्यं धूर्ता नाम्नैव केवलम् ॥ ७२ ॥

आवुत्तो गणिकाकान्तो भगवत्यपि वर्णिनी ।
अत्तेति गणिकामाता गुरुः कापालिकः स्मृतः ॥ ७३ ॥

१. T³ इत्येव कथ्यते ।

जादेति पुत्रवात्सल्यान्मात्रा पुत्रोऽभिधीयते ।
सर्वावज्ञाविशेषोत्थकामचाराभिभाषणे ॥ ७४ ॥

हमित्येवाभिधातव्यं सर्वैरिङ्गितगोपने ।
भर्तृमाताङ्गनाभिर्वा चेटीभिर्गणिकाथवा ॥ ७५ ॥

वार्तासु सर्वदा काममज्जुकेति[1] निगद्यते ।
आयुष्मन्निति वक्तव्यो रथी सारथिना सदा ॥ ७६ ॥

अभीष्टवस्तुसंसिद्धौ येन केनापि चोदितः ।
प्रथमः कल्प इत्येव प्रवदत्यासनायकः ॥ ७७ ॥

प्रतिहारीजनः सर्वो विजयेत्यभिधीयते ।
वणिक्प्रधानो यो लोके स स्मृतः सार्थवाहकः ॥ ७८ ॥

सर्वेश्वरः सरसधीः प्रतिबुद्धशास्त्रः
श्रीवामराशिगुरुपादयुगप्रसादात् ।
विद्वन्मुदे नियतभाषितसर्वभाषा-
विज्ञानकृद् व्यधित साधु निरुक्तमेतत् ॥ ७९ ॥

[2]इति श्रीमन्मलयजमहापण्डितसर्वेश्वराचार्यविरचिते साहित्यसारे
तृतीयः प्रकाशः ।

१. P केत्यभिधीयते.
२. M P T3 इति साहित्यसारे तृतीयः प्रकाशः.

चतुर्थः प्रकाशः

अङ्कावतारः ।

अङ्कस्यान्ते समुत्पत्तिरङ्कस्यार्थाविशेषतः ।
अङ्कावतारः कथितः सर्वनाटककोविदैः ॥ १ ॥

विष्कम्भकः ।

विष्कम्भकस्तु संक्षेपादतीतागतवस्तुनोः ।
सूचको मध्यमकृतः **शुद्धः** सद्भिरुदाहृतः ॥ २ ॥

नीचमध्यमपात्राभ्यां कृतः **सङ्कीर्णको** भवेत् ।

चूलिका ।

नैपथ्यपात्रविहिता सूचनार्थस्य **चूलिका** ॥ ३ ॥

नायिका ।

उदारा चतुरा प्राज्ञा मृद्वी रूपान्विता सती ।
नायिका कथ्यते सद्भिर्नाटके नायकोचिता ॥ ४ ॥

स्वकीयान्यासमानेति सा पुनस्त्रिविधा भवेत् ।

स्वकीयानायिकाभेदाः ।

स्वकीया विधेवन्नेत्रा संप्राप्तकरपीडना ॥ ५ ॥

मुग्धा मध्या प्रगल्भेति सापि त्रेधा निगद्यते ।
मुग्धा स्वल्पवयाः क्रोधा[1] मृद्वी सम्मुग्धभाषिणी ॥ ६ ॥

अज्ञातसुरतोल्लासा किञ्चिदुद्यन्मनोभवा ।
न कोऽपि भेदो नाट्यादौ सर्वत्रैकविधावसौ ॥ ७ ॥

---

१. P T: सर्वत्रैकविधेव सा.

धीरा मध्या त्वधीरेति मध्यमा त्रिविधा भवेत् ।
धीरा मध्या सलालितं पश्यति स्मेरया दृशा ॥ ८ ॥

कथाभिः सोपहासाभिर्दुनोति दयितं क्रुधि ।
स्वयं मध्या समुद्भिद्यद्यौवनानङ्गशालिनी ॥ ९ ॥

मोहान्तसुरतोल्लासा कोपे किञ्चिद्विकत्थना ।
मध्या धीरेतरा वदध्वा करे गद्गदभाषिणी ॥ १० ॥

कृतापराधं दयितं सखीनां ताडयेत् पुरः ।
धीरा मध्या त्वधीरेति प्रगल्भापि त्रिधा भवेत् ॥ ११ ॥

धीरा प्रगल्भा सक्रोधा सोल्लासेनैव चक्षुषा ।
सापराधं प्रियं दृष्ट्वा सावहित्थादरा भवेत् ॥ १२ ॥

प्रगल्भा स्वयमुद्भिन्नमन्मथोन्मादमन्थरा ।
सुरतालापलीलायामप्यत्यर्थं[2] विचेतना ॥ १३ ॥

विलीयमानेवाभाति दयितालोकने मुदा ।
कोपे मधुरसस्यन्दि वक्रोक्त्या खेदयेत् प्रियम् ॥ १४ ॥

धीरेतरा प्रगल्भा[3] तु कुपिता मदमन्थरम् ।
प्रियं प्रत्यप्रियं वक्ति गम्भीरमधुराक्षरम् ॥ १५ ॥

मध्याप्रगल्भाभेदानां प्रत्येकं भरतादिभिः ।
ज्येष्ठाकनिष्ठाभेदेन द्वादशैताः प्रकीर्तिताः ॥ १६ ॥

अन्यानायिका ।

अन्याधीनतया काव्येष्वन्यस्त्री कन्यका मता ।
नान्योढा कथ्यते क्वापि रसोऽङ्गिनि कवीश्वरैः ॥ १७ ॥

---

१. M $T_{1.2}$. आनन्द for अनङ्ग.
२. P T_3. अचेतना for विचेतना.
३. PT_3. प्रगल्भेयम्.
४. PT_3. स्मृता.

र्यादश्चाङ्गिसम्बन्धं कन्यकामदनोदयम् ।
न्योढाचरितं कापि जनहासाय विन्यसेत् ॥ १८ ॥

समाना नायिका ।

कलासु कुशला धूर्ता समाना गणिका स्मृता ।
गात्र तद्विस्तरोऽस्माभिरुच्यतेऽन्यत्र रूढितः ॥ १९ ॥

नायिकावस्थाः ।

आसामवस्थाश्शास्त्रोक्ता भवन्त्यष्टौ मनोहराः ।
उत्कण्ठिता विप्रलब्धा खण्डिता प्रोषितप्रिया ॥ २० ॥

स्वाधीनपतिकाश्लिष्टा वाससज्जाभिसारिके ।
प्रिये चिरयति व्यक्तं कुपितोत्कण्ठिता भवेत् ॥ २१ ॥

विप्रलब्धा समदना सङ्केतच्चलिता वधूः ।
व्यक्तव्यलीके दयिते खण्डिता रोषरूषिता ॥ २२ ॥

यस्या देशान्तरगतो भर्ता सा प्रोषितप्रिया ।
स्वदासकल्पदयिता स्वाधीनपतिका भवेत् ॥ २३ ॥

प्रिये निर्वासिते रोषादश्लिष्टा तापपीडिता ।
अलङ्कृता वसेत् प्रीत्या वाससज्जा प्रियागमे ॥ २४ ॥

कामार्ताभिसरेत् कान्तं सारवेद् वाभिसारिका ।

।

दूत्यो दासी सखी कारुर्धात्रेयी प्रातिवेशिका ॥ २५ ॥

लिङ्गिनी शिल्पिनी स्वं च नेतृमित्रगुणान्विताः ।
दासी स्वकीया चेटीस्यात् सखी स्वस्याः समा वधूः ॥ २६ ॥

रजकी कारुरुदिता धात्रेयी मातृसन्निभा ।
प्रतिवेश्मनि तिष्ठन्ती कथ्यते प्रातिवेशिका ॥ २७ ॥

लिङ्गिनी भिक्षुणी प्रोक्ता शिल्पिनी चित्रकारिका ।
स्वयं चेत्येवमेवात्र दूतीनामष्टकं भवेत् ॥ २८ ॥

नायिकानां सात्त्विकावस्थाः ।

नारीणां सत्वसम्भूता ह्यलङ्करणविंशतिः ।
भावहावौ च हेला च स्त्रीणामङ्गोद्भवास्त्रयः ॥ २९ ॥

शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता ।
औदार्यं धैर्यमित्येते सप्त ख्याता ह्ययत्नजाः ॥ ३० ॥

लीला विलासो विच्छित्तिर्विभ्रमः किलिकिञ्चितम् ।
मोट्टायितं कुट्टमितं बिम्बोको ललितं गतिः ॥ ३१ ॥

एते स्वाभाविका ख्याता दश विंशे च विंशतिः ।
रागाविष्टं मनो भावः हावस्तत्सूचनाविधिः ॥ ३२ ॥

स एव हेला सुव्यक्ता शृङ्गाररसपोषकः ।
यौवनोदयसम्भोगैः शोभा देहगता द्युतिः ॥ ३३ ॥

मदनोद्दीपिताकारा सैव कान्तिरिति स्मृता ।
प्रतीयमानोऽपरथा दीप्तिः स्यात् कान्तिविस्तरः ॥ ३४ ॥

अनुल्बणत्वं माधुर्यं परुषेणापि वस्तुना ।
प्रागल्भ्यं साध्वसाभावः कामसन्दीपनोचितः ॥ ३५ ॥

औदार्यमुद्धतस्यापि प्रश्रयोन्मिश्रभाषणम् ।
अतिस्थिरगुणाश्लिष्टा मनोवृत्तिस्तु धैर्यकम् ॥ ३६ ॥

---

१. P T 3 have the following line in addition :
उत्तमानुगता पुत्री आत्रेयी सोदरोपमा ।

प्रियानुकरणं लीला मधुराङ्गविचेष्टितैः ।
तत्कालजनितोल्लासो विलासोऽङ्गक्रियादिषु ॥ ३७ ॥

स्वल्पाप्याकल्परचना[1] विच्छित्तिः कान्तिपोषकृत् ।
त्वरया विभ्रमः स्थाने भूषास्थानविपर्ययः ॥ ३८ ॥

अश्रुक्रोधभयादीनां सङ्करः किलिकिञ्चितम् ।
मोट्टायितं प्रियालापे तद्भावपरिभावनम् ॥ ३९ ॥

सानन्दमन्तः कुट्टमितं क्रोधः केशग्रहादिषु ।
गर्वादिष्टतमे पुंसि बिम्बोकोऽनादरक्रिया ॥ ४० ॥

सुकुमारोऽङ्गविन्यासो मसृणं ललितं भवेत् ।
[2]विचित्रकथना प्रायो भङ्गिरेव गतिर्भवेत् ॥ ४१ ॥

नायकभेदाः ।

स्वभावशुद्धो मेधावी रक्तलोको दृढव्रतः ।
शूरः प्रियंवदस्त्यागी मधुरो लोकविश्रुतः ॥ ४२ ॥

युवा विद्वत्प्रियो भोगी गीतादौ निपुणः प्रभुः ।
नाटके नायकः प्रोक्तो नाट्यशास्त्रविचक्षणैः ॥ ४३ ॥

धीरोपपदसम्बन्धैः सम्भेदैर्लोकविश्रुतैः ।
नेता चतुर्धा ललितः शान्तोदात्तोद्धतैरिह ॥ ४४ ॥

निश्चिन्तो यौवनोद्दामः कलाकुशलमानसः ।
समृद्धो धीरललितो विलासी वनितप्रियः ॥ ४५ ॥

सामान्यगुणभूयिष्ठः सविशेषपराक्रमः ।
मितभाषी निर्विकारो धीरशान्तो द्विजादिकः ॥ ४६ ॥

---

१. M. आकार for आकल्प.
२. P विचित्रकथनप्राया.

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः ॥ ४७ ॥

गर्वितो मत्सरग्रस्तो मायावी कामनिष्ठुरः ।
धीरोद्धतो हितद्वेषी वीरश्चण्डो विकत्थनः ॥ ४८ ॥

रसे चतुर्विधो नेता शृङ्गारे नाटकादिषु ।
अनुकूलो दक्षिणश्च शठो धृष्ट इति क्रमात् ॥ ४९ ॥

एकामेवाश्रयेद् यस्तु सोऽनुकूल इति स्मृतः ।
ज्येष्ठायामपि गोहिन्यां सस्नेहो दक्षिणो भवेत् ॥ ५० ॥

गूढविप्रियकारी यः स शठः कथ्यते बुधैः ।
व्यलीकविक्रमश्लाघी धृष्टो लज्जाविनाशकः ॥ ५१ ॥

पूर्वोक्तास्ते तु चत्वारः प्रत्येकोऽर्थदशावशात् ।
काव्यनाटकभेदेषु भवन्त्येव हि षोडश ॥ ५२ ॥

नैव भेदोऽनुकूलस्य स्थिरैकदयिताश्रितेः ।
ज्येष्ठमध्यकनिष्ठत्वसम्पादनविधिक्रमात् ॥ ५३ ॥

अष्टाधिकं पुनस्तेऽपि चत्वारिंशद् भवन्ति च ।

नायकस्य सात्त्विकगुणाः

शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी ॥ ५४ ॥
ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ।
दीनेषु करुणा स्पर्धा गुणाढ्येषु पराक्रमः ॥ ५५ ॥

दक्षता शास्त्रविषये शोभेति विदुषां मता ।
गतिर्गभीरा दृष्टिश्च सगर्वा सस्मितं वचः ॥ ५६ ॥

विलासः सत्त्वसम्पन्नः पुरुषस्य निगद्यते ।
मन्दो विकारो माधुर्यं संक्षोभे सुमहत्यपि ॥ ५७ ॥

विकारहेतावुत्पन्ने गाम्भीर्यं निर्विकारता ।
व्यवसायादचलनं विघ्नैरत्यर्थमाकुलात् ॥ ५८ ॥

नेतुरुत्तमभावस्य स्थैर्यमाहुर्मनीषिणः ।
अधिक्षेपादिदोषाणां कृतानामहितैर्जनैः ॥ ५९ ॥

सद्यः स्वप्राणनाशेऽपि तेजः स्यादसहिष्णुता ।
शृङ्गाराकारचेष्टावन्मृदुत्वं ललितं विदुः ॥ ६० ॥

औदार्यं प्राणदानादि परस्योज्जीवनेच्छया ।

नायकसहायादयः ।

तत्सहायाः पीठमर्दस्तथा विटविदूषकौ ॥ ६१ ॥

किञ्चिन्न्यूनगुणस्तत्स्यात् पताकानायको महान् ।
सर्वविद्यासु निपुणः पीठमर्दोऽभिधीयते ॥ ६२ ॥

एकविद्याविशेषज्ञो विटः सुललिताकृतिः ।
हाससम्पादनपटुर्विरूपो हि विदूषकः ॥ ६३ ॥

लुब्धो धीरोद्धतः स्तब्धो नीतिशून्योऽतिगर्वितः ।
परनिन्दानिरतधीः पापकृत् प्रतिनायकः ॥ ६४ ॥

मन्त्री स्वं वा सखा तस्य द्वयं वा द्रव्यचिन्तने ।
सचिवायत्तसंसिद्धिर्ललितो नायको भवेत् ॥ ६५ ॥

उभयायत्तसिद्धिः स्याद्धीरशान्तो महामतिः ।
मन्त्रिष्वारोपितभरः प्रत्यक्षं मनसा स्वयम् ॥ ६६ ॥

स्वतन्त्रं कुरुते कार्यं धीरोदात्तस्तु नायकः ।
नेता धीरोद्धतः शश्वत् स्वाधीनाशेषकारकः ॥ ६७ ॥

धर्मेषु देवभूदेवगुरुवर्णिपुरोहिताः ।
दण्डनीतिविधौ तस्य नेतुरेते महत्तराः ॥ ६८ ॥

बृहत्कुमारको दण्डी कोशसामन्तसैनिकाः ।
अन्तःपुरे वर्षवराकिराता मूकवामनाः ॥ ६९ ॥

म्लेच्छाभीरकिरातार्द्याः विस्रम्भस्यैकभूमयः ।
एवंविधो भवेन्नेता नाट्यकः सपरिच्छदः ॥ ७० ॥

भाषाप्रयोगव्यवस्था ।

राजविप्रविटामात्यसुभटाधीतयोषिताम् ।
नटनर्तकधूर्तानां संस्कृतं पाठ्यमुच्यते ॥ ७१ ॥

देवदानवगन्धर्वसिद्धनागेशरक्षसाम् ।
काञ्चुकीयप्रतीहारालिङ्गिनीवाणिजामपि ॥ ७२ ॥
विद्याधरवर्षवरमहादेवीविलासिनाम् ।
योगिनां योगिनीनां च संस्कृतं सम्प्रयोजयेत् ॥ ७३ ॥

छद्मलिङ्गप्रविष्टानां निर्ग्रन्थानां तापस्विनाम् ।
शाक्यचक्रचराणां च संस्कृतं न प्रयोजयेत् ॥ ७४ ॥

अधमानां कुविद्यानामज्ञानामल्पचेतसाम् ।
क्षुत्पीडाविकलानां च संस्कृतं न प्रयोजयेत् ॥ ७५ ॥

स्त्रीणां तु प्राकृतं प्रायश्शूरसेन्यधमेषु च ।
पिशाचात्यन्तनीचादौ पैशाचं मागधं तथा ॥ ७६ ॥

शकारभाषा पण्डानां प्रकृत्या जडचेतसाम् ।
यद्देश्यं नीचपात्रं यत् तद्देश्यं तस्य भाषितम् ॥ ७७ ॥

३

आभीरभाषा वक्तव्या सर्वेषां घोषवर्तिनाम् ।
कार्यतश्चोत्तमादीनां कार्यो भाषाविपर्ययः ॥ ७८ ॥

शृङ्गाररसमूर्च्छायां गीते च ऋतुवर्णने ।
सर्वासामपि नारीणां संस्कृतं सम्प्रयोजयेत् ॥ ७९ ॥

---

१. T_1. ४ तापस for दानव.
२. P जटावतां.
३. P T_3 घोषवासिनां.

भगवन्तोऽपरैर्वाच्या विद्वद्देवार्षिकेक्षिणः ।
विप्रामात्याप्रजाचार्यनटीसूत्रभृतो मिथः ॥ ८० ॥

विदूषकेण सर्वत्र नायिका परिचारिका ।
राजमाता च धात्री च भवतीति निगद्यते ॥ ८१ ॥

राज्ञ वयस्य इत्येव नामपूर्वं विदूषकः ।
विदूषकेण राजा च निर्नामं तद्वदेव हि ॥ ८२ ॥

भावोऽनुगेन सूत्री च मार्षेत्येतेन सोऽपि च ।
आमन्त्रणीया ह्यन्योन्यमेवमन्येऽपि युक्तितः ॥ ८३ ॥

अङ्कास्यः ।

अङ्कान्तसंस्थितैः पात्रैरुत्तराङ्कार्थसूचनम् ।
विचित्रभणितिप्रायमङ्कास्यं कथ्यते बुधैः ॥ ८४ ॥

प्रवेशकः ।

अङ्कद्वयान्तरालस्थो नीचपात्रप्रयोजितः ।
प्राकृत्युत्पन्नभाषावानिति ज्ञेयः प्रवेशकः ॥ ८५ ॥

मलयजमुनिपुङ्गवेन तुङ्ग-
स्फुरितयशोविसरेण नाटकादेः ।
रचितमिदमुदीक्ष्य लक्ष्म रम्य-
स्मितमधुराननतां व्रजन्तु सन्तः ॥ ८६ ॥

[3] इति श्रीमन्मलयजमहापण्डितसर्वेश्वराचार्यविरचिते साहित्यसारे चतुर्थः प्रकाशः ।

---

१. P राजापि विना नाम तथैव हि.
२. M मारिषेत्येव सोऽपि च.
३. M साहित्यसारे चतुर्थः प्रकाशः, PT[3] इति सर्वेश्वरविरचिते साहित्यसारे चतुर्थः प्रकाशः.

पञ्चमः प्रकाशः ।

काकुः ।

साकाङ्क्षा च निराकाङ्क्षा चेति काकुर्द्विधा भवेत् ।
अनिर्युक्ताक्षरा वाणी साकाङ्क्षेति निगद्यते ॥ १ ॥
निर्युक्ताक्षरसंयुक्ता निराकाङ्क्षा भवेदिह ।

रसस्वरूपम् ।

अन्यैरव्यक्तमुक्तत्वाद् दुर्विज्ञेयतयापि च ॥ २ ॥
रसः सस्मेरमस्माभिः सम्यगेव विचार्यते ।

विभावैः सानुभावोद्यत्सात्त्विकव्यभिचारिभिः ॥ ३ ॥
स्वादुत्वं नीयमानोऽसौ स्थायी भावो रसो भवेत् ।

विभावः ।

निरन्तरपदव्यापी सदैव रसपोषकृत् ॥ ४ ॥
कोऽपि हेतुस्तदुत्पत्तेर्विभाव इति कथ्यते ।

अनुभावः ।

विकारः कोऽपि शारीरो भावसंसूचनात्मवान् ॥ ५ ॥

अनुभाव इति प्राज्ञैराख्यातो भरतादिभिः ।

सात्त्विकभावाः ।

सुखदुःखादिभिर्भावैरनुकारिण्यवस्थितैः ॥ ६ ॥

निरन्तरसमुद्भेदैर्भावस्तद्भावभावनम् ।
यद्यप्याकलयन्त्युच्चैरनुभावादभिन्नताम् ॥ ७ ॥

१. PT3 द्विविधा काकुरुच्यते.
२. PT3 स्वादुताम् .

पृथगेव भवन्त्येते भावाः सर्वत्र सात्त्विकाः ।
स्तम्भप्रलयरोमाञ्चस्वेदा वैवर्ण्यवेपथू ॥ ८ ॥

अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः ।
स्तम्भस्तु निष्क्रियाङ्गत्वं प्रलयो नष्टसंज्ञता ॥ ९ ॥

रोमाञ्चो रोमनिर्भेदः स्वेदः शीकरनिर्गमः ।
वैवर्ण्यं वर्णनाशः स्यात् वेपथुर्गात्रकम्पनम् ॥ १० ॥

अश्रु नेत्राम्बु वैस्वर्यं विस्वरत्वमुदाहृतम् ।
नाटकादिष्विमे भावा नाट्यतत्त्वविचक्षणैः ॥ ११ ॥

सत्त्वादेव समुत्पत्तेः सात्त्विका इति संज्ञिताः ।

व्यभिचारिभावाः ।

सविशेषाभिमुख्येन स्थायिनोऽन्तश्चरन्ति ये ॥ १२ ॥
सम्यगुन्मग्ननिर्मग्नास्ते मता व्यभिचारिणः ।
निर्वेदग्लानिचिन्तेर्ष्यामदमोहमतिश्रमाः ॥ १३ ॥

शङ्काधृतिस्मृतिव्र्याधिवितर्कोन्माददीनताः ।
आवेगालसतात्रासव्रीडामर्षौग्रतास्मयाः ॥ १४ ॥

जडतामरणस्वप्नविषादौत्सुक्यविभ्रमाः ।
अपस्मारावहित्थौन्द्र्यप्रबोधप्रीतयस्तथा ॥ १५ ॥

त्रयस्त्रिंशदिमे भावा विख्याता व्यभिचारिणः ।
सर्वलोकप्रसिद्धोऽसौ निर्वेदः स्वावमाननम् ॥ १६ ॥

तत्त्वज्ञानापदीर्ष्यादेस्तदुत्पत्तिर्हि दृश्यते ।
ग्लानिः शरीरवैवश्यं कथ्यते सर्वकोविदैः ॥ १७ ॥

१. T_1 त इमे व्यभिचारिणः.
२. M विद्वेषा.

उत्पाद्यते तत् सर्वत्र क्षुत्पिपासाश्रमैः ।
भवेयुस्तत्र वैवर्ण्यकम्पानुत्साहविक्रियाः ॥ १८ ॥

सर्वैः सर्वत्र निर्दिष्टा चिन्ता ध्यानैकतानता ।
इष्टनाशादनिष्टस्य सम्भवाद्वा तदुद्भवः ॥ १९ ॥

तत्र स्युश्चित्तवैक्लव्यतापनिश्वासनिर्गमाः ।
परोत्कर्षाक्षमासूया कल्पनीया मनीषिभिः ॥ २० ॥

गर्वदौर्जन्यमन्युभ्यः साधु संजायते नृणाम् ।
दोषोक्त्यवज्ञाभ्रुकुटीतर्जनानि भवन्ति हि ॥ २१ ॥

हर्षोत्कर्षो मदः प्रोक्तः परिणामेऽङ्ग देहिनाम् ।
अभीष्टप्राप्तिसम्भोगपानाद्यैः सम्भवैः ॥ २२ ॥

स्खलद्वचो गुरुजनतर्जनं भवन्ति हि ।
मोहो विचित्रा शोभा देहनैवश्यकारिणी ॥ २३ ॥

तस्यापि सम्भवो भीतिदुःखावेशानुचिन्तनैः ।
तत्राज्ञानभ्रमापातचूर्णनादर्शनादयः ॥ २४ ॥

मतिस्तत्त्वगता बुद्धिरद्धा शिष्टसम्मता ।
सापि निष्पद्यते लोके शास्त्रार्थतत्त्वसम्पदः ॥ २५ ॥

तत्राभ्रान्तिगुणोत्कर्षादसन्दिग्धनादयः ।
खेदः सर्वाङ्गविश्रान्तः श्रम इत्यभिधीयते ॥ २६ ॥

स युद्धमार्गगत्यादिव्यापारेणोपजायते ।
अस्मिन्नपि स्युरङ्गेषु स्वेदसम्मर्दनादयः ॥ २७ ॥

अनर्थादौ समुत्पन्ने शङ्का स्यात् प्रतिभाक्षयः ।
पराविनयतः स्वस्थ दुर्नयाद् वोपजायते ॥ २८ ॥

भवेयुरस्मिन्नातङ्ककम्पवैवर्ण्यवेदनाः ।
अशेषभोगभोक्तृत्वं धृतिरित्यभिधीयते ॥ २९ ॥

१. P T_3 वैक्लव्य.
२. The next twenty lines are missing T_3.

शक्तिज्ञानादिसन्तोषात् सापि सञ्जायते परम् ।
अस्यामभिमतानन्दसंप्राप्तिरधिकं भवेत् ॥ ३० ॥

कथ्यते विबुधैः सर्वैः स्मृतिः संस्मरणादयः
सदृशज्ञानचिन्तादिसम्पद्भवः सापि जायते ॥ ३१ ॥

एतस्यामनुभावाः स्युर्भ्रूसमुन्नमनादयः[3] ।
व्याधयः सन्निपाताद्यास्तेषामन्यत्र विस्तरः ॥ ३२ ॥

वितर्कस्तु विचारः स्यादतिसन्दिग्धवस्तुनि ।
विकल्पशास्त्रप्रश्नादेरुत्पत्तिस्तस्य दृश्यते ॥ ३३ ॥

तत्राङ्गुलीविचलनभ्रूशिरोवक्रतादयः ।
अनिरूपितकारित्वमुन्मादः परिकीर्तितः ॥ ३४ ॥

ज्ञानाभावान्वितात्पर्यशोकादिभ्यः स जायते ।
तस्मिन्नस्थानरुदितगीतहासस्मितादयः ॥ ३५ ॥

सर्वेष्वङ्गेष्वनौजस्यं दैन्यमाहुर्मनीषिणः ।
इह सन्दृश्यतेऽस्माभिर्दौर्गत्यात्तस्य संभवः ॥ ३६ ॥

तत्रैते स्वयमेव स्युर्मालिन्यानादरादयः ।
आवेगः सहसा जातः सम्भ्रमो हि निगद्यते ॥ ३७ ॥

राजानिलाहितस्निग्धवृष्टिवह्निभ्य एव च ।
उत्पातादथवा नाशादुत्पत्तिस्तस्य दृश्यते ॥ ३८ ॥

शस्त्रनागाभियोगादिर्दृश्यते राजविप्लवे ।
वातादौ पांसुसम्पाते रिपुजे दुःखसन्ततिः ।
मित्रजे हर्षसम्पातो वृष्टिजे पिण्डिताङ्गता ॥ ३९ ॥

---

१. M अस्यामभिहितानन्द, P अत्यन्ताभिमतानन्द
२. T_1. सम्पत्त्या.
३. The next forty five lines are full of lacunae in T_8.
४. M सम्प्रकीर्तितः.
५. The next three lines are missing in M.
६. P वातजे.

वाह्निजे धूमसम्पातस्त्रस्ततोत्पातजो भेवत् ।
करिजे स्युर्भयस्तम्भकम्पापसरणादयः ॥ ४० ॥

सर्वाङ्गसादि लोकानामालस्यं जिह्मता[1] मता ।
उद्भूतिश्रमगर्भादेस्तस्य सन्दृश्यते जनैः ॥ ४१ ॥

तस्यानुभावा वैवर्ण्यस्तोकभाषणजृम्भिताः ।
तत्त्वज्ञैर्मनसः कम्पस्त्रास इत्यभिधीयते ॥ ४२ ॥

गजमेघाशनिस्थूणासङ्घट्टादुपजायते ।
भवन्ति पतनोत्कम्पसम्भ्रूतालोकनादयः ॥ ४३ ॥

अङ्गनामहिमाहेतुर्लज्जा व्रीडेति कथ्यते ।
अगम्यागमनादिभ्यः सा परं जायते भुवि ॥ ४४ ॥

अङ्गावरणवैवर्ण्यसाचीकृतमुखादयः ।
अमर्षोऽभिहितः सद्भिर्दोषेष्वाभिनिवेशनम् ॥ ४५ ॥

अधिक्षेपात्प्रमादाद् वा रोषाद्वा जायते च सः ।
तत्र स्वेदाक्षिचलनताडनग्रहणादयः ॥ ४६ ॥

चण्डतैव हि सर्वेषामुग्रता विदुषां मता ।
दुष्टापवाददौर्मुख्यचौर्यैः सा जायते परम् ॥ ४७ ॥

तत्र स्वेदशिरःकम्पतर्जनाताडनादयः ।
स्मयः सर्वजनोन्मादी गर्व एवेह कथ्यते ॥ ४८ ॥

ऐश्वर्यबललावण्यरूपेभ्यस्तत्समुद्भवः ।
तत्रावज्ञाविलासाङ्गविभूषालटहादयः ॥ ४९ ॥

प्रतिपत्तेरभावेन स्तब्धता जडता मत ॥
सा समुत्पद्यते लोके दयितालोकनादिभि· ॥ ५० ॥

अस्यामपि भवेत् सद्यस्त्वनिमेषनिरीक्षणम् ।
प्रसिद्धिमपि वक्तव्यं मरणं भूतपञ्चता ॥ ५१ ॥

१. [illegible] जिह्मतिमता।

विरहव्याधिदुष्कर्मविधिभ्यस्तस्य सम्भवः ।
जनताशोकाविण्मूत्रस्तम्भनिश्चेष्टतादयः ॥ ५१ ॥

सम्मीलनं हि चित्तस्य निद्रेति परिगीयते ।
दुःखातिरेकवैक्लव्यमनःखेदादिभिर्भवेत् ॥ ५२ ॥

तत्र स्युरङ्गविक्षेपश्वासायासक्रियादयः ।
विषादः कथ्यतेऽस्माभिः सत्त्वस्थैर्यहः संक्षयः ॥ ५३ ॥

प्रारब्धवस्तुभङ्गादेरुत्पत्तिस्तस्य दृश्यते ।
निश्वासोच्छ्वासहृत्तापसहायान्वेषणादयः ॥ ५४ ॥

कालक्षमत्वमौत्सुक्यं कथ्यते कविपुङ्गवैः ।
हृद्यवस्तुसुहृद्योगरत्यास्थादेस्तदुद्भवः ॥ ५५ ॥

तत्रोच्छ्वासत्वरात्रासहृत्तापस्वेदविभ्रमाः ।
विभ्रमः कथ्यते श्लाघ्यैरात्मश्लाघाक्रमादयः ॥ ५६ ॥

हृद्यकालकलाकान्ताकलापैरुपजायते ।
तत्रानुभावा रोमाञ्चस्वेदमन्दस्मितादयः ॥ ५७ ॥

भूतप्रेतपिशाचानामपस्मारोऽधिरोहणम् ।
मन्त्रतन्त्रक्रियालेपैः सोऽपि सम्पद्यते नृणाम् ॥ ५८ ॥

भूवातकम्पप्रस्वेदलालाफेनोद्गमादयः ।
काले मनस्संवरणमवहित्थं विदुर्बुधाः ॥ ६० ॥

लज्जादिविक्रियाहेतुस्तत्समुत्पत्तिकर्मणः ।
तत्र सार्चीनवक्त्रत्वमिथ्याजल्पविहस्तताः ॥ ६१ ॥

अनवस्थाक्रमाकारमान्द्यं चापलमेव हि ।
कथ्यते च तदुत्पत्तौ हेतुर्मर्कटचित्तता ॥ ६२ ॥

तत्रानुभावाः पारुष्यस्वच्छन्दाचरणादयः ।
निद्राभावः प्रबोधः स्यादसौ विख्यात एव हि ॥ ६३ ॥

स तु सर्वत्र सन्तोषपरिमाणादिसम्भवः ।
तत्र जृम्भाशिरःकम्पनयनोन्मीलनादयः ॥ ६४ ॥

सर्वाङ्गीणः प्रमोदस्य व्यापारो हर्ष उच्यते ।
अभिप्रेतोत्सवादिभ्यस्तस्य जन्मोपलभ्यते ॥ ६५ ॥

तस्मिन्नेवोपजायन्ते सस्वेदा गद्गदा गिरः ।
[illegible] ।
न तिरस्क्रियते गोऽन्यैर्भावैर्विपरिवर्तिभिः ॥ ६६ ॥

अन्येषामात्मतां कुर्वन् स स्थायी कथ्यते बुधैः ।
भावके वर्तमानत्वादास्वाद्यत्वाच्च भूयशः ॥ ६७ ॥

रसः स एव निर्दिष्टो रसिकैर्भरतादिभिः ।
वृत्तेरकार्ये चेत् स्वादः कस्येदानीं सुखावहः ॥ ६८ ॥

काव्यं[1] न तत् प्रीतिकरं वर्तमानसुखावहम् ।
स्वदते कथमस्थायी निर्वेदादिरनादितः ॥ ६९ ॥

तद्रूपभावविभवस्तेनाष्टौ स्थायिनः स्मृताः ।
रत्युत्साहौ जुगुप्सा च शोकमोहभयस्मयाः[2] ॥ ७० ॥

क्रोधश्च कश्चिदस्त्यन्यो नेहास्माभिः स कथ्यते ।
एतेषां काव्यबन्धेन स्वशब्दैरनिवेदितः ॥ ७१ ॥

सम्बन्धः कल्पनीयो हि भाव्यभावकसंश्रितः ।
शश्वत् सहृदयग्रन्थे परिनिष्ठितचेतसः ॥ ७२ ॥

१. T_2 वाक्यं.
२. M शोकमोहौ भयंस्मयौ.

काव्यार्थभावनास्वादो नर्तकस्यापि वर्तताम् ।

स्वादः ।

स्वादः काव्यार्थसम्भेदादात्मन्यानन्दसम्भवः ॥ ७१ ॥

विकासविस्तरक्षोभविक्षेपैः स चतुर्विधः ।
शृङ्गारवीरबीभत्सरौद्रेषु क्रमशः क्रमात् ॥ ७४ ॥

हास्याद्भुतभयोत्कर्षकरुणानां त एव हि ।

भावः ।

हृद्यदेशकलावेषकालभाषाविभूषितः ॥ ७५ ॥

यूनोरन्योन्यसंसक्तचेतसोः सहशोदयः ।
निर्भरो यः प्रमोदः स्यात् स एव हि रतिः स्मृतः ॥ ७६ ॥

सैव लावण्यपीयूषभूषितेङ्गचेष्टितैः ।
प्रकृष्यमाणा शृङ्गारः स सैरिह कथ्यते ॥ ७७ ॥

भावा अनेकोनपञ्चाशद्देवस्य परिपोषकाः ।
आलस्यमरणोग्रत्वजुगुप्सास्तु विरोधिनः ॥ ७८ ॥

असम्भवोऽवियोगश्च सम्भोगश्चेति स त्रिधा ।
असम्भवोऽनुरागः स्याद् यूनोरासक्तचित्तयोः ॥ ७९ ॥

सङ्गमाभावसुभगः पराधीनतया मिथः ।
भवन्त्यत्र दशावस्था निर्दिष्टाः शास्त्रकोविदैः ॥ ८० ॥

संस्मृत्युद्वेगाभिलाषप्रलापोन्मादसंज्वराः ।
चिन्तागुणकथाजाड्यमरणानि यथाक्रमम् ॥ ८१ ॥

जगतस्तन्मयत्वेन दर्शनं संस्मृतिः स्मृता ।
हृद्यवस्तुषु विद्वेषो ह्युद्वेगः कथ्यते बुधैः ॥ ८२ ॥

१. M स्वादुः.
२. M एतेऽस्य.

अभिलाषः स्पृहा प्रोक्ता काम्ये सर्वाङ्गसुन्दरे ।
असम्बद्धकथालापः **प्रलाप** इति कथ्यते ॥ ८३ ॥

उन्मादश्चेतसो भ्रान्तिरनवस्थानिबन्धना ।
संज्वरस्तु समस्ताङ्गव्यापी तापोदयो महान् ॥ ८४ ॥

चिन्ता सदैव तल्लभा बुद्धिरन्यानपेक्षिणी ।
तदलाभे तत्प्रशंसा **गुणाख्यानं** निगद्यते ॥ ८५ ॥

चिन्तास्तिमितकायत्वं जळता विदुषां मता ।
सुप्रसिद्धं तु मरणं सर्वेषां कीर्तिशेषता ॥ ८६ ॥

वियोगो विप्रलम्भः स्यादतिविस्रब्धयोर्द्वयोः ।
मानप्रवासभेदेन स पुनर्द्विविधो भवेत् ॥ ८७ ॥

स्त्रीणामीर्ष्याकृतो मानः कोपोऽन्यासङ्गिनि प्रिये ।
श्रुते वा कल्पिते बुद्ध्या दृष्टे वा तत्समुद्भवः ॥ ८८

श्रुतिः सखीमुखात्तत्र कर्तव्या नाटकादिषु ।
अनुमाच्छलनिद्रान्ध्यगोत्रस्खलनलक्षणा ॥ ८९ ॥

सर्वत्र दर्शनोत्पन्नः साक्षादिन्द्रियगोचरः ।
तत्र माने सुमहति षड्डुपायविधिः स्मृतः ॥ ९० ॥

सामभेदौ प्रदानं च नत्युपेक्षा रसान्तरम् ।
तत्र प्रियवचः **साम** भेदस्तत्सख्युपार्जनम् ॥ ९१ ॥

दानं भूषणदानादि पादयोः पतनं **नतिः** ।
उपेक्षा समये निन्दा तदीयजनसंसदि ॥ ९२ ॥

रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम् ।
अन्यः प्रणयमानः स्यादव्यापारसमुद्भवः ॥ ९३ ॥

प्रवासो भिन्नदेशत्वं[1] कार्यसम्भ्रमशापजः ।
अनुभावा भवन्त्यत्र द्वयोरपि विशेषतः ॥ ९४ ॥

---

१. P देशभिन्नत्वं.

निश्वासनिर्गमत्रासकार्श्यलम्बालकादयः ।
सोऽपि भावी भवाज्जात इति त्रेधैव निश्चितः ॥ ९५ ॥

अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ ।
दर्शनस्पर्शनादीनि स सम्भोगो मुदान्वितः ॥ ९६ ॥

चेष्टास्तत्र प्रवर्तन्ते लीलाद्या दश योषिताम् ।

वीरः ।

विभावितः प्रभावाद्यैर्दानाद्यैरनुभावितः ॥ ९७ ॥
भावितः स्मृतकार्श्याद्यैरुत्साहो वीरतां व्रजेत् ।

बीभत्सः ।

विभावितो विस्रगन्धवमथुश्लेष्मकीटकैः ॥ ९८ ॥
रुधिरान्त्रवसामांसैरत्यर्थमनुभावितः ।
भवेज्जुगुप्सा बीभत्सो व्यावेगप्रायभावितः ॥ ९९ ॥

रौद्रः ।

परप्रवृद्धिविद्वेषवैरिवैकृतसम्भवः ।
भ्रुकुटीरचनाकम्पस्वेदाद्यैरनुभावितः ॥ १०० ॥

भावितो मदगर्वाद्यैः क्रोधो रौद्रो भवेत् स्वयम् ।

हासः ।

विकृताकृतिवाग्वेषैरात्मनो वापरस्य वा ॥ १०१ ॥
विभावितो भवेद्धासो हास्यस्मितविशोषितः ।
स्मितमुत्फुल्लनयनं हसितं साद्वेजप्रभम् ॥ १०२ ॥

स्वनयुक्तं विहसितमुपहासस्तु कम्पकृत् ।
अपहासः सनीराक्षो व्यतिहासोऽश्रुपातकः ॥ १०३ ॥

ज्येष्ठमध्यकनिष्ठानां द्वौ द्वौ स्यातां यथाक्रमम् ।
निद्रालस्यश्रमग्लानिमूर्छाद्या व्यभिचारिणः ॥ १०४ ॥

अद्भुतः ।

अतिलोकैः पदार्थैः स्याद् विस्मयात्मा रसोऽद्भुतः ।
अस्यानुभावा नेत्राम्बुवेपथुस्वेदगद्गदाः ॥ १०५ ॥

हर्षावेगधृतिप्राया भवन्ति व्यभिचारिणः ।

भयानकः ।

विकृतस्वनसत्त्वादेर्भयभावो भयानकः ॥ १०६ ॥

प्रभूतस्वेदवैवर्ण्यशोषवेपथुलक्षणः ।
त्राससम्भ्रमसम्मोहदैन्यानि व्यभिचारिणः ॥ १०७ ॥

करुणः ।

इष्टनाशादनिष्टादेः शोकात्मा करुणो रसः ।
निश्वासोच्छ्वासरुदितस्तम्भप्रलपितादयः ॥ १०८ ॥

तत्रापस्मारदैन्यान्ध्यसम्भ्रमा व्यभिचारिणः ।

रसानां वर्णदेवतादयः ।

श्यामवर्णस्तु शृङ्गारो विष्णुस्तत्राधिदैवतम् ॥ १०९ ॥

गौरो वीरस्तु विज्ञेयो महेन्द्रस्तस्य देवता ।
नीलवर्णो हि बीभत्सो महाकालोऽधिदैवतम् ॥ ११० ॥

रौद्रः कपोतवर्णः स्यात् रुद्रस्तस्याधिदैवतम् ।
सितो हास्यः स्मृतः सद्भिरीशः प्रथमदैवतम् ॥ १११ ॥

पीतवर्णोऽद्भुतः प्रोक्तस्तस्याधीशः पितामहः ।
भयानकः कृष्णरूपः स हि कालाधिदैवतः ॥ ११२ ॥

हरिद्वर्णस्तु करुणो यमस्तदधिदैवतम् ।
अनेनैव क्रमेणासौ ज्ञातव्यो रसविस्तरः ॥ ११३ ॥

शृङ्गारे कैशिकी, वीरे सात्त्वत्यारभटी पुनः ।
रसे रौद्रे सबीभत्से, वृत्तिः सर्वत्र भारती ॥ ११४ ॥

१. M $T_{1.2}$ अतिलोकपदार्थैः.

यत्र बीजस्य संहारो यत्रार्थः पर्यवस्यति ।
सर्वेषां यत्र निष्क्रान्तिः सोऽन्त इत्यवगम्यताम् ॥ ११५ ॥

धर्मस्वधर्मानुष्ठानं धर्माणां वा विधेयता ।
प्रजानां पालनेनैव षड्भागग्रहणं धनम् ॥ ११६ ॥

समानकुलधर्माढ्यगृहिण्यां गृहमेधिनः ।
कृतकृत्यस्य सम्भोगः काम इत्यभिधीयते ॥ ११७ ॥

निश्शेषासारसंसारविचारचतुरात्मनः ।
मोक्षः स्याज्ज्ञानसम्पत्त्या परमानन्दसङ्गतिः ॥ ११८ ॥

संमिश्राः केवला वा स्युरेतत् सर्वत्र नाटके ।
समासौ सर्वसन्तोषो ह्युदर्कप्रीतिरुच्यते ॥ ११९ ॥

उक्तलक्षणनिष्पत्तिप्रसक्त्या सम्यगर्पितम् ।
पञ्चाङ्कं नाटकं हीनं दशाङ्कं प्राहुरुत्तमम् ॥ १२० ॥

सर्वेश्वरो रसविशेषविचारमेव-
मापादयन्नमृतसोदरवाक्प्रवाहैः ।
आनन्दहेतुरधुना भुवि कस्य न स्यात्
साहित्यसारसरसीरुहराजहंसः ॥ १२१ ॥

इति श्रीमन्मलयजमहापण्डितसर्वेश्वराचार्यविरचिते साहित्यसारे
पञ्चमः प्रकाशः ।

M· इति साहित्यसारे पञ्चमः प्रकाशः,' P Γ3 इति सर्वेश्वराचार्यविरचिते
रे रसस्रोतःसि पञ्चमः प्रकाशः ।

षष्ठः प्रकाशः ।

नाटकम् ।

कीर्तिकामो महोत्साहो धीरोदात्तः प्रतापवान् ।
अभिगम्यगुणैर्युक्तः त्रय्यास्त्राता महीपतिः ॥ १ ॥

कर्तव्यो नाटके नेता देवो राजर्षिरेव वा ।
प्रख्यातमेव कर्तव्यं वृत्तमप्याधिकारिकम् ॥ २ ॥

अत्यर्थानुचितं यत् स्यात् नायकस्येतरस्य वा ।
तत् परित्यज्यतां सम्यगन्यथा वा प्रकल्पयेत् ॥ ३ ॥

साधन्तं वस्तु निश्चित्य पञ्चधा संविभज्य च ।
खण्डशस्सन्धिसंज्ञांस्तान् भागान् कुर्याद् विचक्षणः ॥ ४ ॥

चतुष्षष्ट्यङ्गसन्धानं [1]तदज्ञैः कल्पयेत् पुनः ।
पताकावृत्तमप्यूनं विन्यसेत प्रकरीमपि ॥ ५ ॥

विष्कम्भकं वा प्रथममङ्कं वा कार्ययोगतः ।
प्रत्यक्षनेतृचरितः सबिन्दुव्याप्तिभूषणः ॥ ६ ॥

अङ्को नानाप्रकारार्थसार्थ एव हि शोभनः ।
सविभावानुभावान्यस्थायिनः सम्यगञ्चितः ॥ ७ ॥[2]

गृहीतमुक्तैः कर्तव्यं प्रौढत्वं व्यभिचारिभिः ।
न नयेद् वस्तुविच्छेदमत्यन्तरसपोषणात् ॥ ८ ॥

रसं च न तिरोदध्यात् वस्त्वलङ्कारलक्षणैः ।
शृङ्गारोऽप्यथवा वीरः [3]कर्तव्यो वाङ्गिलक्षणः ॥ ९ ॥

रसानां पुनरन्येषां अङ्गत्वं प्रतिपाद्यताम् ।
भोजनस्नानसुरतवधसंरोधसङ्गरान् ॥ १० ॥

---

१. T1·2 तदंशैः·
२. T1.2· भावान्यस्थायिनः PT3 भावो वा स्थायिनः.
३. T1. करुणो.

विवाहदूरगमन देशराज्याद्युपप्लवान् ।
गन्धमाल्याम्बरादीनि प्रत्यक्षाणि न निर्दिशेत् ॥ ११ ॥

द्वित्रणामेव पात्राणामेकदैवागमो भवेत् ।
सर्वेषां निर्गमे जाते सम्भवेन्नेतृनिर्गमः ॥ १२ ॥

प्रकरणम् ।

ततः **प्रकरणे** वस्तु वक्तव्यं स्वमनीषया ।
लोकवार्ताश्रयं हृद्यं व्यवहारक्रमोचितम् ॥ १३ ॥

सचिवद्विजवैश्यानां एक एव हि नायकः ।
धीरप्रशान्तः सोपायो धर्मकामार्थतत्परः ॥ १४ ॥

द्विविधा नायिका तत्र कुलस्त्री गणिका तथा ।
क्वचिदेकैव कुलजा वेश्या क्वापि द्वयं क्वचित् ॥ १५ ॥

अभ्यन्तरस्था कुलजा वेश्या बाह्यैव सर्वदा ।
शुद्धं शुद्धेतरं तद्वत् सङ्कीर्णमिति तत्त्रिधा ॥ १६ ॥

शुद्धं कुलस्त्रिया युक्तमितरद् गणिकाश्रितम् ।
आभ्यां सङ्कीर्णकं धूर्तविटचेटीजनाश्रितम् ॥ १७ ॥

शेषं नाटकवत् सन्धिप्रवेशकरसादिकम् ।

नाटिका ।

अत्रैव वर्तते सापि **नाटिका** नाटकोद्भवा ॥ १८ ॥

तत्र प्रकरणाद् वस्तु नाटकाच्चापि किञ्चन ।
नायको ललितः ख्यातः कामभोगैकनिष्ठितः ॥ १९ ॥

स्त्रीप्राया चतुरङ्का च शृङ्गारोऽङ्गी सलक्षणः ।

°. P T_3 विवाहं दूरगमनं देशराज्यादिविप्लवम्.
२ T_3 कथ्यते.
३. PT_3 जनावृतं.
४. P प्रोक्तः.

देवी तत्र भवेद् ज्येष्ठा प्रगल्भा नृपवंशजा ॥ २० ॥

तदधीनतया कृच्छ्रादन्यस्या नेतृसङ्गमः ।
वृत्तिस्तु कैशिकी तत्र पूर्वोक्ताङ्गसमन्विता ॥ २१ ॥

सन्धिसन्ध्यङ्गरचना यथारम्भं विधीयते ।

सट्टकम् ।

प्रायेण नाटिकाप्रायं चतुर्यवनिकान्तरम् ॥ २२ ॥

विष्कम्भकादिभिः सर्वैर्विहीनं पञ्चसूचकैः ।
सट्टकं स्त्रीजनाकीर्णमेकभाषामयं भवेद् ॥ २३ ॥

भाणम् ।

धूर्तानां चरितं भाणं ख्यातपत्तनसंश्रयम् ।

तत्र पात्रं विटस्त्वेको निपुणः शास्त्रकोविदः ॥ २४ ॥

उक्तिप्रत्युक्तिविधयः सम्यगाकाशभाषितैः ।

विधेयाः कल्पनीयानि लास्याङ्गानि दशापि च ॥ २५ ॥
शृङ्गारवीरौ संसूच्यौ शौर्यसौभाग्यसंस्तवैः ।

मुखनिर्वहणे सन्धी तदङ्गैरपि भूषितः ॥ २६ ॥
एकाङ्कस्थापनायुक्तो भारत्या स तु संस्कृतः ।

ईहामृगः ।

ईहामृगोऽपि विज्ञेयः चतुरङ्कस्त्रिसन्धिकः ॥ २७ ॥

दिव्यावनियतावत्र नायकप्रतिनायकौ ।
धीरोद्धतौ ख्यातवृत्तौ यदृच्छासङ्गता मिथः ॥ २८ ॥

वधूं दिव्यामनिच्छन्तीं हठादाहर्तुमिच्छतः ।
शृङ्गारलेशमधुरः सम्यगारब्धसङ्गरः ॥ २९ ॥

१. Six lines from this are omitted in T3.
२. T1. 2 यथालाभं.
३. T1 चातुर्यवनितान्तरं.

छलेन येन केनापि तत्र युद्धं निवारयेत् ।
सङ्कीर्णो वृत्तवृत्तिभ्यां कर्तव्यश्च कवीश्वरैः ॥ ३० ॥

वीथी ।

वीथी सकैशिकीवृत्तिरेकाङ्का स्थापनावती ।
एकपात्रकृता साङ्गमुखनिर्वहणाश्रिता ॥ ३१ ॥
देवतापसविख्यातकथासम्बन्धशालिनी ।
रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम् ॥ ३२ ॥
हृद्यपद्यावलिप्राया तदङ्गानि त्रयोदश ।
छलप्रपञ्चत्रिगतवाक्केलीगण्डनालिकाः ॥ ३३ ॥
उद्घात्यकावलगिते व्याहारातिबले तथा ।
असत्प्रलापमृदवे तथावस्यन्दितं पुनः ॥ ३४ ।
अशोभनैः शोभनाभैरर्थैरुक्तिश्छलं भवेत् ।
मिथ्यास्तुतिर्मिथो जाता प्रपञ्च इति कथ्यते ॥ ३५ ॥
श्रुतिसौम्यादनेकार्थयोजनं त्रिगतं मतम् ।
वाक्केलिर्मधुरा वाणी नर्मणा गर्भिता भवेत् ॥ ३६ ॥
गण्डमप्रस्तुतं वाक्यं प्रस्तुतस्याविरोधतः ।
प्रहेलिकेव गूढार्था नालिकेति निगद्यते ॥ ३७ ॥
गूढार्थपदसम्बन्धा नानाप्रश्नोत्तरावलिः ।
अन्तर्लापादिकाः साद्भिरुद्घात्यमिति कथ्यते ॥ ३८ ॥
विहाय प्रस्तुतं कार्यं यदन्यत् साध्यते नरैः ।
तत्रावलगितं प्राहुस्तदेव कविपुङ्गवाः ॥ ३९ ॥
हासाय प्रस्तुतं वाक्यं व्याहरोऽर्थान्तराश्रितम् ।
अन्योन्यवाक्याधिक्योक्तिः स्पर्धयातिबलं भवेत् ॥ ४० ॥
असत्प्रलापः प्रायेण सम्बन्धरहितं वचः ।
दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ॥ ४१ ॥
वचसामन्यथाख्या यवस्यन्दितमुच्यते
एवंविधाङ्गसम्बन्धा वीथी वीथीविदुच्यते ॥ ४२ ॥

व्यायोगः ।

विख्यातवृत्तो व्यायोगो विख्यातोद्धतनायकः ।
हीनो गर्भावमर्शाभ्यां दीप्ता हास्यादयो रसाः ॥ ४३ ॥
वृत्तिरारभटी प्रायो बहुक्रूरजनावृतः ।
एकाहश्चरितैकाङ्का ह्यस्त्रीकारणसङ्करः ॥ ४४ ॥

समवकारः ।

कुर्यात समवकारेऽपि सम्यगामुखलक्षणम् ।
ख्याता देवासुरकथा वस्तुत्वेन निरूप्यताम् ॥ ४५ ॥
कैशिक्या रहितास्तत्र वृत्तयः परिकीर्त्तिताः ।
सुरासुरास्तु नेतारो निर्विमर्शाश्च सन्धयः ॥ ४६ ॥
अत्र द्वादश नेतॄणां फलं कुर्यात् पृथक् पृथक् ।
वीरप्रायरसस्त्र्यङ्कस्त्रिश्रृङ्गारस्त्रिविद्रवः ॥ ४७ ॥
कपटत्रितयोपेतः चित्रोक्त्या परिपूरितः ।
द्विसन्धिरङ्कः प्रथमः कार्यो द्वादशनालिकः ॥ ४८ ॥
नालिकानां द्वयोः पश्चात् प्रत्येकं स्यात् चतुष्टयी ।
नालिका[1] घटिकायुग्ममिति सर्वजनश्रुतिः ॥ ४९ ॥
वस्तुस्वभावदैवारिकृताः स्युः कपटास्त्रयः ।
देशोपरोधसङ्ग्रामवाह्निभ्यो विद्रवास्त्रयः ॥ ५० ॥
धर्मार्थकामैः शृङ्गारो नात्र बिन्दुप्रवेशकौ ।
वीथ्यङ्गानि यथाकामं सोपहासानि कल्पयेत् ॥ ५१ ॥

अङ्कः ।

उत्सृष्टिकाङ्के विख्यातं वस्तु बुद्ध्या प्रपञ्चयेत् ।
करुणाख्यो रसः स्थायी नेतारः पूर्वकल्पिताः ॥ ५२ ॥
सन्धिसन्ध्यङ्गवृत्त्यङ्गैर्भाणवत् परिकल्पयेत् ।
स्त्रीणामालापसंलापविलापादिभिराकुलम् ॥ ५३ ॥
वाचा विधेयः सङ्ग्रामो वचसैव जयाजयौ ॥

---

१. M. नाडिका.

प्रहसनम् ।

ततः प्रहसनं प्रायः कल्पयेद् बुद्धिवैभवैः ॥ ५४ ॥

शुद्धं सविकृतं तद्वत् सङ्कीर्णमिति तत् त्रिधा ।
द्विजपाषण्डिदुर्वर्णचेटचेटीविटाकृतम् ॥ ५५ ॥

वेषभाषाविभूषाद्यैः शुद्धं हासकृतं भवेत् ।
